CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का० शा २०४
१६९१६

श्रीगणेशाय नमः ।

अथ वर्णबीजप्रकाशभूमिका ।

अयि निगमागमप्रणयिनो विद्वांसो नातितिरोहितमेतद् यथा खलु ऋग्यजुःसामरूपाणां वैदिकसूक्तीनां पदार्थनिर्णये तत्रभवद्यास्काचार्य-भास्कररायादिसंकलितो निघण्टुनामा कोषः, यथा वा गद्यपद्यगानरूपाणां लौकिकसूक्तीनां पदार्थनिर्णयेऽग्निपुराणादिसमुद्धृतो नामलिङ्गानुशासननामा कोषोऽतितरां समुपयुज्यते; तथैवागमापरनामधेयानां तन्त्राणां पदार्थनिर्णयेऽयमुपक्रान्तोऽभूतपूर्वसारल्यक्रमो वर्णबीजप्रकाशाभिधः कोष इति । वर्णा अकारादिक्षकारान्ता एकपञ्चाशत्, पञ्चाशद् वा, बीजानि वाग्भवमायाकामादिभेदेन नानाविधानि; तदेतद्द्वयेषां मन्त्रोद्धारेऽपेक्षेति ।

यथा खल्वपौरुषेयो वेदः कर्मोपासनाज्ञानलक्षणेन काण्डत्रयेण, प्रसक्तानुप्रसक्तया कर्मोपासनाज्ञाननिरूपणासु विज्ञानेनान्येन पदार्थजातेनानुस्यूतश्चतुर्विधपुरुषार्थसंपादकस्तथेदं तन्त्रमपि । अत एव श्रीमद्भागवते भगवद्वाक्यम्—'**वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम्**' (एकादश० ११ अध्या. २७ श्लो.) इति । 'वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः' (एकादश. २७ अध्या० ७ श्लो.) इति च । एतेन सांख्ययोगयोरिव वेदतन्त्रयोरेकफलभागिता निरूपिता भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीक्षाशब्दनिरुक्तिस्त्वागमे—'दिव्यज्ञानं यतो दद्यात्कुर्यात्पापस्य संक्षयम् । तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः ॥' इति । अस्या अत्यन्तमुपादेयतापि तत्रैव—'दीक्षामूलो जपः सर्वो दीक्षामूलं परं तपः। दीक्षामाश्रित्य निवसेद् यत्र कुत्राश्रमे वसन् ॥ अदीक्षिता ये कुर्वन्ति तपः पूजादिकाः क्रियाः । न भवन्ति प्रिये तेषां शिलायामुप्तबीजवत् ॥ देवि दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः । तस्मात्सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ।' इति ।

यथा वेदे–'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥' (ऋ. सं. २ अध्या. ३ अनु. २२ व.) इति । 'तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः ॥ ' (य. सं. ३२ अध्या. १ मं.) इति । 'अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् । तमादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ॥ उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् । स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः ॥ स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥' (कैवल्योपनिषत् ६–९ मं.) इति चैवमादिभिः श्रुतिभिरेक एव परमेश्वरस्तथा तन्त्रेऽपि पूर्वदक्षिणपश्चिमोत्तरोर्ध्वानुत्तराम्नायभिन्नैर्मन्त्रजातैरिति । एवमेकत्वेऽपि तत्तच्छब्दप्रवृत्तिनिमित्तानुगृहीतया गुणकल्पनयाऽनेकत्वमव्याहतमेव । अनेकत्वेऽपि नानाभेदोपबृंहितासु सगुणब्रह्मपञ्चधारास्वन्यतमाया 'यथाभिमतध्यानाद्वा' (यो. द. १९. २९ स.) इत्यादिनीत्या प्राधान्यं सिद्धान्तयित्वा भुक्तिमुक्तिनिदानमुपासनाक्रमाः प्रस्तूयन्ते । तथाच पञ्चायतनीं लक्ष्यीकृत्य गणेशविमर्शिन्याम्—'शम्भौ मध्यगते हरीनहरभूदेव्यो हरौ शंकरेभास्यनागसुता रवौ हरगणेशाजाम्बिकाः स्थापिताः । देव्यां विष्णुहरैकदन्तरवयो लम्बोदरेऽजेश्वरे नार्याः शंकरभागतोऽतिसुखदा व्यस्तास्तु ते हानिदाः ॥ इति ।

अयमभिप्रायः—यद्यप्येकः परमेश्वरस्तथापि तस्मिन्निराकारेह्युपासकचित्तावतरणार्थमाश्रयणीयानामाकारविशेषाणामावश्यकतया तस्यैव हरिहरादिरूपा लीलाविग्रहा अनेकधा वर्ण्यते।एवं च क्वचिद् हरिरेव जगदीश्वरः,क्वचिद् हर एव,क्वचिद् गणेश एव क्वचित् सूर्य एव क्वचिच्छक्तिरेव इत्यादि तत्र तत्र प्रतिपादनमेकस्यैव जगदीश्वरस्य न पुनरन्यस्य । एवमेव चैकस्योपासना विधिशेषतयाऽन्यस्यापकर्षवचनं तत्र तत्र निरूपितम् । नह्यन्यथा पर्यायेणैकस्याङ्गाङ्गिभाववर्णनं महर्षिभिरुपदिष्टमुपादेयं स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नहि च बहवो जगदीश्वराः क्वापि दर्शने निरूप्यन्ते; जगज्जन्मादिनियमस्याव्यवस्थापत्तेरिति दिक् ।

इदमन्यथापि प्रतिमंतव्यम्—'जन्माद्यस्य यतः—शास्त्रयोनित्वात्' (वे. द. १ । १ । २–३) इति ब्रह्मणस्तटस्थलक्षणान्तःपातिनी क्वापि सृष्टिर्जातिगुणक्रियायदृच्छोपाधिना शब्देनैव ज्ञायत इति, परमेश्वरश्चावाङ्मनसगोचरतया स्वानुभवैकमान इति विलक्षणकर्तृत्त्वादिनावसीयते । अवसीयमानश्च निरूपाधिकोऽपि सोपाधिक इति दार्शनिकानां प्रतिपादनशैली । तथाच स्मार्यते—'**अतीतः पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्यायं चकितमभिधत्ते श्रुतिरपि । स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्ववाचीने पतति न मनः कस्य न वचः** ॥' इति । इत्थं च प्रतिलीलाविग्रहाभिधाने सोपाधिनिरुपाधिवन्तोऽभिधायकाः प्रवर्तते, येषां च यथाक्रमं हानोपादानयोर्व्यावर्तकयोगायोगतया भेदाभेदौ प्रतिपाद्येते । तथाहि—

भेदकास्तावदेते ।

(१) गोविन्दः .... गां भुवं धनुं स्वर्गं वेदं वा अविदत् ।
विद्लृलाभे । गवादिषु विन्देः संज्ञायाम् इति वार्तिकेन शः ।

(२) चन्द्रशेखरः .... चन्द्रः शेखरो यस्य सः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(३) गजाननः .... गज आननमस्य सः । समुदायशब्दा अवयवेऽपि वर्तन्ते इति गजमुखपरो गजशब्दः ।

(४) भास्करः .... भाः करोति । 'दिवाविभानिशाप्रभा-भास्कर—' इति टः ।

(५) उमाः .... ओर्महेशस्य मा लक्ष्मीः ।

अभेदकास्त्वते ।

(१) विष्णुः .... वेवेष्टि । विषूल्ट्न्याशौ विषेः किच्च' इति नुः ।

(२) ईश्वरः .... ईशितुं शीलमस्य । ईश ऐश्वर्ये । स्थेश भास—'इति वरच् ।

(३) विनायकः .... विनयति ण्वुल् । विगतो नायको नियन्तास्येतिवा ।

(४) सविता .... सुवति प्रेरयति । षू प्रेरणे । तृच् ।

(५) प्रकृतिः.... .... प्रकरोति । क्तिच् । प्रकृष्टा कृतिः कार्य-मस्या वा ।

अत्र भेदकनामग्रहणे पञ्चभिरपि गोविन्दादिभिः परस्परं निरपेक्षा गोविन्दादयो व्यक्तयो निगमागमसंकेतिता बुध्यन्ते । अभेदकनामग्रहणे तु पञ्चभिरपि विष्णुप्रभृतिभिरेकं वस्तु विशिष्यमाणं बुध्यत इति सूक्ष्मदशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रष्टव्यम् । अत एव पुराणेतिहासतन्त्रेषु तत्तल्लीलाविग्रहाणां सहस्रनामस्तोत्रादिषु भेदकाभेदकलक्षणमुभयात्मकं नाम स्मर्यते ।

अथात्र सपर्याविधाने यत्कचिन्मद्यग्रहणं तच्छूद्रविषयम् । तथाच श्रीक्रमे-'न दद्याद्ब्राह्मणो मद्यं महादेव्यै कथंचन । वामकामो ब्राह्मणोऽपि मद्यं मांसं न भक्षयेत् ॥ देव्याश्च पश्चिमे भागे चक्रार्थं निवेदयेत् । तत्तद्द्रव्यं तु शूद्रस्य नान्येषां तु कदाचन ॥ वैश्यस्य माक्षिकं शुद्धं क्षत्रियस्य तु साज्यकम् । ब्राह्मणस्य गवां क्षीरं ताम्रे वा विसृजेन्मधु ॥ नारकेलोदकं कांस्ये सर्वेषां द्रव्यशोधनम् इति ॥ गोक्षीरं ब्राह्मणो दद्यात् गव्यमाज्यं च बाहुजः । वैश्यैश्च माक्षिकं देयं शूद्रः पैष्यादिकं चरेत् ॥' इति च तेन शूद्रस्याप्यनुकल्पः एवमन्यत्रापि स्मर्यते-'विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैस्त्वां देवि त्रिपुरे परां परमयीं संतर्प्य पूजाविधौ । यां यां प्रार्थयते मनः स्थिरधियां तेषां त एव ध्रुवं तां तां सिद्धिमवाप्नुवन्ति तरसा विघ्नैरविघ्नीकृताः ॥'इति । यत्तु कैश्चित् न मांस-' (मनु अध्या. ५ श्लो ५६) इति वाक्यमन्यथान्यथा पर्यनुयोज्यते तद् 'लोके व्यवायामिषमद्यसेवा नित्यास्तु जन्तोर्नहि तत्र चोदना । व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति (एकादश ९ अध्या. ११ श्लो.) श्रीमद्भागवतीयेन वाक्येन व्यवस्थीयते । इह मीमांसकप्रक्रियाविचारः श्रेधर्या द्रष्टव्यः । यत्पुनः शक्त्युपासकानां कौलशब्देन, क्वचिद् व्यवहारस्तस्यैतत्तात्पर्यम्-मूलाधारादिचक्रं कुलशब्देन तदुपरि शिरसः सहस्रदलमकुलशब्देन चोच्यते। तदिदं ध्यानैकगम्यमत्यन्तं दुरवगाहम् । तथा च स्मर्यते-कुलं केचित्प्राहुर्वपुरकुलमन्ये तव बुधाः परे तत्संभेदं समभिदधते कौलमपरे । चतुर्णामप्येषामुपरि किमपि प्राहुरपरे महामाये तत्त्वं तव कथममी निश्चिनुमहे ॥इति ।तत्र चक्रेषु कुण्डलिन्या अन्वयलयप्रत्त्यावृत्तिरूपा भूमिका श्रीमद्भगवत्पादैरित्थं दर्शिता 'महीं मूलाधारे कमपि मणिपूरे हुतवहं स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि। मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥ सुधा धारासारैश्चरणयुगलान्तर्विगलितैः प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसा । अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥' इति । इह महीमित्याद्यन्वयभूमिकया या या सिद्धिर्जायते सा सा सिद्धिसोपाने निरूपिता । 'कुण्डलिन्या महीभेदे योगी त्यजति मेदिनीम्। सलिलस्थानभेदेतु जले चरति योगवित्॥ वह्निभेदे जलामीति स्पृशत्याग्निं ज्वलच्छिखम्। मरुद्भेदे शीघ्रगतिर्याति क्रोशशतं क्षणात्॥ व्योमभेदे खेचराति मनोभेदे मनोगतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्र कामयते तत्र याति लोकत्रयेऽपि च ॥ संयोजने शिवपदे शिव एव प्रजायते । कर्ता हर्ता च सर्वत्र सुरासुरनमस्कृतः ॥' इति । एतेन कौलपदार्थों निरूपितो भवतीति दिक् ।

संप्रति मूलतन्त्राणां लुप्तप्रायत्वादुपलब्धानामपि बहुत्र प्रक्षेपयोगेन शङ्कनीयत्वाद् बहूनां निबन्धाभासानां जाज्वल्यमानतान्त्रिकापसदानां बहुलीभावाच्चास्तसीमानमारुरुक्षुरिवायमागमकल्पशाखीति प्रत्यक्षं निर्णायकानाम्।एवं सत्यपि कलिकालमहिम्ना सत्संप्रदायाचार्यैर्यावद्बुद्धिबलोदयमागमाख्यभारतराजरक्षणेप्रयत्नेऽनुपेक्षणीय इति भारतभुवां कर्तव्यता । तथाचोक्तम्—

वेशं भाषां तथाचारं शास्त्रं च विविधागमम् ।
संरक्षता यथायोगं जन्मभूप्रकृतिः कृता ॥'

किमतः परमिति विवेकेन वैष्णवानां शैवानामन्येषां चोपासकानामास्तिकपुंगवानामुपास्यमन्त्रोद्धारे प्रतिपदमुपयुक्तोयं कोषः तथाहि—

अथ '**विष्णुमन्त्रः** । मायान्ते विष्णवे हृच्च षड्वर्णः सर्वसिद्धिदः ॥' माया= ह्रीं । हृत्=नमः । शेषं स्पष्टम् ॥

अथ **नारायणाष्टाक्षरमन्त्रः** । 'अष्टार्णं शृणु देवस्य वक्ष्ये नारायणात्मकम् । तारो नमः पदं प्रोच्य नरौ दीर्घसमन्वितौ । पवनो णाय मन्त्रोऽयं प्रोक्तो वस्वक्षरात्मकः ॥' तारः = ॐ पवनः = य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ **नृसिंहमन्त्राः**।'नारसिंहं प्रवक्ष्यामि , शृणु सर्वभयापहम्। मेरुः कृशानुसंयुक्तोऽनुग्रहेन्दुविभूषितः॥ एकाक्षरो नरहरेर्मन्त्रः कल्पद्रुमो नृणाम्। अक्षरः संपुटः प्रोक्तो मायया प्रणवेन वा॥ श्रीबीजेनाथ वा देवि भजतां चिन्तितप्रदः॥' मेरुः = क्ष, कृशानुः = र, अनुग्रहः = औ, शेषं स्पष्टम्॥

अथ **राममन्त्रः**। श्रीरामस्य मनुं देवि शृणु तापत्रयापहम्। वह्नि-र्नारायणेन्दुभ्यां युक्तो वह्निस्तु दीर्घवान्॥ नारायणान्विता तन्द्री क्षुध हृच्च षडर्णकः॥'वह्निः = र, नारायणः = आ, तन्द्री = म, क्षुधा = य, शेषं स्पष्टम्॥

अथ **कृष्णमन्त्रः**। अथ वक्ष्ये महादेवि विद्यां चाष्टादशाक्षरीम्।यज्जपा-च्छातकान्मुक्तो वैकुण्ठं परमश्नुते॥कृष्णाय पदमाभाष्य गोविन्दायपदं ततः॥ गोपीजनपदस्यान्ते वल्लभाय द्विठान्तकः॥ कामबीजादिराख्यातो मनुरष्टा-दशाक्षरः।' कामः = क्लीं; द्विठान्तकः = स्वाहा।

अथ **महामृत्युञ्जयमन्त्रः**। 'तारः खं व्यापिनी चन्द्रयुक्तारश्चतु-रानन। अर्घीशविन्दुसंयुक्ता पञ्चमो भृगुसर्गवान्॥ भूर्भुवः स्वः पदं प्रोच्य त्र्यम्बकं पदमुद्धरेत्। यजामहे पदं पश्चात्सुगन्धिपुष्टिवर्धनम्॥ ऊर्वारुकमिव प्रोच्य बन्धनात्पदमुच्चरेत्। मृत्योर्मुक्षीय उच्चार्य मामृतात्पद-मुद्धरेत्॥ भूर्भुवः स्वः पुनः प्रोच्य तारं जूं सर्गवान्भृगुः। आकाशोऽनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रहश्चन्द्रयुक्तस्तारस्ततः परम् ॥ महामृत्युञ्जयाख्योऽयं पञ्चाशद्वर्णसंयुतः॥' तारः = ॐ, खम् = ह, व्यापिनी = औ, चन्द्रः = ०, चतुरानना = ज, अर्वीशः = ऊ, भृगुः = स, आकाशः = ह, अनुग्रहः = औं, शेषं स्पष्टम्। एतेन 'ॐ हौं ॐ जूँस भूर्भुवः स्वः त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय मामृतात् भूर्भुवः स्वः ॐ जूँ सः हौं ॐ, इति मन्त्रः उद्धृतः। एवं पूर्वत्राप्यूह्यम्।

अत्रेदं स्पष्टं प्रतीयते यत्खलु तत्तन्तन्मन्त्रोद्धारवाक्ये पारिभाषिकाणां मायापवनादिशब्दानां शक्तिग्राहके कोषेऽसति कथमपिमहामतिमद्भिरपि मन्त्रवर्णा उद्धर्तुं न शक्यन्ते, किमुतान्येन वराकेण। अहो एवमायासेनामी मन्त्रा उद्धृताः, किमिति निगदेनैव न पठिता यदि पर्यनुयोज्येत, तदपि न सांप्रतम्। नहि लौकिका वैदिका वा शब्दा इव मन्त्रवर्णाः प्रकृतिप्रत्ययनिबन्धनाः स्मर्यन्ते येन तथापाठे निर्वाहः स्यात्र। प्रत्युत बहुत्र वर्णान्तरहानोपादानसंभवे विनिगमनाभावादशुद्धिसद्भावे परमार्थतः प्रच्युतेरनर्थश्चोत्पद्येत। इह 'मन्त्रो हीनः स्वरतो वर्णतो वा इति निरुक्तोद्धृतः शाखान्तरीयो मन्त्रोऽप्युदाहार्य इति दिक। तथा मन्त्रवर्णेषु संप्रदायविरोधिनी संहितापि न कार्या। यथा—'भूर्भुवः स्वरोंजूँसोहौमों'एवंप्रकारा।

अथास्य वर्णबीजप्रकाशाख्यस्य कोशस्य प्रणेता अयोध्यापरप्रान्तवर्तिपण्डितपुरीवासी पण्डितश्रीराधाकृष्णतनूजन्म पण्डितश्रीसरयूप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सादशर्मा द्विवेद्यासीत् । एतस्य जीवनवृत्तान्तः श्रीमातृकास्तुतिटीकाया मुखबन्धतो विज्ञेयः । एतत्प्रणीता मुद्रितग्रन्थास्त्वेते–

(१) **सप्तशतीसर्वस्वं** नाम यावत्सप्तशतीविषयावभासकटीकाप्रधानभूतम् ।

(२) **संग्रहशिरोमणिर्नाम** ज्योतिः शास्त्रीयसंहितास्कन्धविषयको महानिबन्धः ।

(३) **सदाचारप्रकाशो** नाम धर्मशास्त्रीयो निबन्धः । एतद् ग्रन्थत्रयं **लखनऊनगरे** मुनशी **नवलकिशोरवर्मणो** यन्त्रालये मुद्रितम् ।

(४) **मातृकास्तुतिव्याख्या** नाम हारीतायनसंहितान्तर्गतब्रह्मादिकृतमातृकास्तुतिटीकारूपा । इयं प्रयागे **इण्डियन्मुद्रणालये** मुद्रिता ।

(५) **वर्णबीजप्रकाशो** नाम सकलतन्त्रग्रन्थानां हृदयभूतः सत्संप्रदायाचार्याणामतितरामुपयुक्तो वस्तुतोऽपूर्वः कोषः ।

अयं दत्त मुद्रणाद्यधिकारो मुंबापुरीगौरवस्तम्भेन वेदवेदाङ्गवेदोपाङ्गपुराणेतिहासप्रभृतिनानाग्रन्थोज्जीवनकर्त्रास्तिकपुंगवेन **क्षेमराज–श्रीकृष्णदास**महोदयेन स्वकीये **"श्रीवेङ्कटेश्वर"** मुद्रणालये मुद्रितः । ग्रन्थकारलिखितपुस्तकाधारेणामुष्य कोषस्य मुद्रणार्थं प्रतिरूपकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादशाब्दात्प्राक् जयपुरवास्तव्येन राजराजेश्वरपूजकेन व्यासोपनामकेन श्रीमदीश्वरशर्मणाऽकारि । मुद्रणार्थं पत्रादिप्रेषणव्यापारे व्यवसायः पण्डितहनुमानशर्मणा व्यधायीति सर्वे यथायोगं स्पृहणीयाः।एवमादिभिश्चिरविहितेन प्रयत्नेन सर्वसाधारणीकृतोऽसौ कोषो गुणैकपक्षपातिनः पण्डितान्सुखयिष्यतीतिदृढमाशास्ते ।

जयपुर राजधानी,
संवत् १९६८ भाद्रकृष्णाष्टमी.

दुर्गाप्रसाद द्विवेदी.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सरस्वती न सुभगा मयस्करत्

वाल्मीकि विद्यापीठ-पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति

वर्णबीजप्रकाशभूमिका

समाप्त ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द०नै० १६८९६

॥ श्रीः ॥

अथ वर्णबीजप्रकाशः ।

पु० २४०

अथाऽवर्गप्रकाशः १

नमामि सकलां नित्यां परमां निष्कलां कलाम् ।
चराचरजगद्धात्रीमरुणां कामरूपिणीम् ॥ १ ॥
अकारादिक्षकारान्तवर्णवैभवविग्रहाम् ।
वाङ्मयीं गुरुरूपां तां मातृकां श्रेयसे श्रये ॥ २ ॥
स्वरस्वत्यानन्दनाथो दुर्गानन्दपदाश्रितः ।
ग्रन्थानालोक्य सुबहून्क्रादिहादिमतानुगान् ॥ ३ ॥
श्रीमज्जयपुराधीशरामसिंहेन सत्कृतः ।
दुर्गाप्रसादसंप्राप्ततत्त्वः संकेतसारवित् ॥ ४ ॥
वर्णबीजप्रबोधार्थं वर्णबीजप्रकाशकम् ।
वर्गवर्णक्रमेणेह करोति विदुषां मुदे ॥ ५ ॥

अथास्मिन्ग्रन्थेऽष्टौ वर्गा अकचटतपयशाः । तेष्वत्र अवर्गः षोडशस्वरात्मकः । कचटतपाः पञ्च पञ्चवर्णात्मकाः । यवर्गश्चतुर्वर्णात्मकः । शवर्गे प्रथमवर्णस्तालव्यः, द्वितीयो मूर्धन्यः, तृतीयो दन्त्यः सकार इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थवर्णो हकारः । पञ्चमो ळकारो मूर्धन्यसंज्ञः 'अग्निमीळे' इत्यादिश्रुतिप्रसिद्धः । क्षकारोऽन्तिमवर्ण इति यथायथमनुसन्धेयम् । अथ स्वरवर्णक्रमेणैवावर्ग आरभ्यते–

१ **अकुलम्,** हमिति व्योमबीजम् । ऊष्मचतुर्थबिन्दुयोगेन ।

२ **अक्रूरः,** ठकारष्टवर्गद्वितीयः ।

३ **अक्षरात्मिका, (:)** विसर्गः षोडशस्वरः ।

४ **अगस्त्यः,** औकारश्चतुर्दशस्वरः ।

५ **अगुणः,** ॐ इति प्रणवः ।

६ **अग्निकान्ता, स्वाहा ।** ठद्वयमिति ।

७ **अग्निबीजम्,** रमिति बिन्दुसहितो रेफः ।

८ **अग्निशुद्धः,** दीर्घ ईकारश्चतुर्थस्वरः ।

९ **अग्निः,** ह्रस्व इकारस्तृतीयस्वरः । ऋकारः अष्टमस्वरः । एकार एकादशस्वरः । ऐकारो द्वादशस्वरः । रकारः अन्तस्थद्वितीयः। हमिति व्योमबीजम् ।

१० **अघोरः,** ओकारस्त्रयोदशस्वरः । हमिति व्योमबीजम् । ( ) अंकारः पञ्चदशस्वरः।

११ **अचला,** दीर्घ ॠकारः अष्टमस्वरः ।

१२ **अचलः,** वकारः पवर्गतृतीयः ।

१३ **अच्छासिनी,** नकारस्तवर्गपञ्चमः ।

१४ **अजरामरः,** गकारः कवर्गतृतीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१५ अजरः, अकारः प्रथमस्वरः । हमिति व्योमबीजम् ।
१६ अजागलः, ऌकारः नवमस्वरः ।
१७ अजितः, गकारः कवर्गतृतीयः । ह्रस्व इकारस्तृतीयस्वरः ।
१८ अजेश्वरः, झकारश्चवर्गचतुर्थः ।
१९ अटवी, जकारश्चवर्गतृतीयः ।
२० अट्टहासिनी, नकारस्तवर्गपञ्चमः ।
२१ अट्टहासः, झकारश्चवर्गचतुर्थः ।
२२ अतिकालः, मकारः पवर्गपञ्चमः ।
२३ अतिथीशः, दीर्घ ॠकारः अष्टमस्वरः ।
२४ अतीता, खकारः कवर्गद्वितीयः ।
२५ अतुला, गकारः कवगतृतीयः ।
२६ अत्ययः, ध्रुमिति तवर्गचतुर्थरेफपञ्चमस्वरबिन्दुयोगेन ।
२७ अत्युग्रः, ख्रीमिति कवर्गद्वितीयरकारचतुर्थस्वरबिन्दुयोगेन ।
२८ अत्रिः, दकारस्तवर्गतृतीयः ।
२९ अत्रीशः, दकारस्तवर्गतृतीयः ।
३० अथर्वदेहजा, दीर्घॡकारः दशमस्वरः ।
३१ अद्धा, ठकारष्टवर्गद्वितीयः । नकारस्तवर्गपञ्चमः ।
३२ अद्रिसुता, ह्रस्व ऋकारः सप्तमस्वरः ।
३३ अद्रीश्वरः, दकारस्तवर्गतृतीयः ।
३४ अद्रिः, दकारस्तवर्गतृतीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३५ **अधरोष्ठः,** ऐकारः द्वादशस्वरः ।
३६ **अधरः,** ऐकारः द्वादशस्वरः ।
३७ **अधिघण्टिका,** (ः) विसर्गः षोडशस्वरः ।
३८ **अधिरूढा,** ह्रस्व इकारस्तृतीयस्वरः ।
३९ **अधोदन्तः,** औकारश्चतुर्दशस्वरः ।
४० **अध्यर्णम्,** एकारः एकादशस्वरः ।
४१ **अनलमण्डलः,** क्षकारः अन्तिमवर्णः ।
४२ **अनलवल्लभा, स्वाहा।**
४३ **अनलः,** रमिति वह्निबीजम् अन्तस्थद्वितीयबिन्दुयोगेन ।
४४ **अनादिकः,** एकारः एकादशस्वरः । तकारः पञ्चमवर्गादिमः ।
४५ **अनामिका,** ऋकारः अष्टमस्वरः ।
४६ **अनिरुद्धः,** (ः) विसर्गः अन्तिमस्वरः । वमिति अमृतबीजम् अन्तस्थचतुर्थबिन्दुयोगेन ।
४७ **अनिलः,** ढकारः टवर्गचतुर्थः । यमिति वायुबीजम् ।
४८ **अनुकम्पिनी,** झकारश्चवर्गचतुर्थः ।
४९ **अनुग्रहेश्वरः,** औकारश्चतुर्दशस्वरः ।
५० **अनुच्चार्या** (ः)विसर्गः षोडशस्वरः ।
५१ **अनुत्तरवर्णकः,** ॐ इति प्रणवस्तारः ।
५२ **अनुत्तराक्षरः,** अकारः प्रथमस्वरः ।
५३ **अनुत्तरः,** अकारः प्रथमस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५४ **अनुनासिकः**, ङकारः कवर्गपञ्चमः । ञकारश्चवर्गपञ्चमः । नकारस्तवर्गपञ्चमः । (ं) अनुस्वारः पञ्चदशस्वरः ।

५५ **अनङ्गमदनातुरा**, तकारः पञ्चमवर्गप्रथमः ।

५६ **अनङ्गमालिनी**, लमिति भूबीजम् अन्तस्थतृतीयबिन्दुयोगेन ।

५७ **अनङ्गमेखला**, चकारस्तृतीयवर्गप्रथमः ।

५८ **अनङ्गवादिनी**, यमिति वायुबीजम् अन्तस्थादिमबिन्दुयोगेन ।

५९ **अनङ्गरुत्**, दीर्घ आकारः द्वितीयस्वरः ।

६० **अनङ्गा**, जकारश्चवर्गतृतीयः ।

६१ **अनङ्गाङ्कुशा**, तालव्यशकारः ।

६२ **अनङ्गः**, ककारः द्वितीयवर्गादिमः ।

६३ **अनन्तक्षयः**, क्षकारः अन्तिमवर्णः ।

६४ **अनन्तशक्तिः**, (ः)विसर्गः अन्तिमस्वरः ।

६५ **अनन्ता**, (ः)विसर्गः अन्तिमस्वरः ।

६६ **अनन्तेशः**, दीर्घ आकारः द्वितीयस्वरः ।

६७ **अनन्तः**, दीर्घ आकारः द्वितीयस्वरः । ऋकारः सप्तमस्वरः । ऌकारः नवमस्वरः । औकारश्चतुर्दशस्वरः । लमिति भूबीजम् । क्षकारः अन्तिमवर्णः । (ं) अनुस्वारः पञ्चदशस्वरः । (ः)विसर्गः षोडशस्वरः ।

६८ **अन्यः**, नकारस्तवर्गपञ्चमः ।

६९ **अपराजिता**, ऌकारः नवमस्वरः । वमिति अमृतबीजम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७० **अपर्णा**, चकारस्तृतीयवर्गादिमः ।
७१ **अपारः**, ॐ इति प्रणवः ।
७२ **अपांपतिः**, रुमिति रेफह्रस्वोकारबिन्दुयोगेन ।
७३ **अब्धिबीजम्**, रुमिति रेफह्रस्वोकारबिन्दुयोगेन ।
७४ **अब्धिरूपा**, ह्रस्व इकारस्तृतीयस्वरः ।
७५ **अभावः**, ठकारः टवर्गद्वितीयः ।
७६ **अभिख्या**, एकारः एकादशस्वरः ।
७७ **अमरनायकः**, ह्रस्व उकारः पञ्चमस्वरः ।
७८ **अमरेशः**, उकारः पञ्चमस्वरः । (:) विसर्गः षोडशस्वरः ।
७९ **अमरः**, क्षकारः अन्तिमवर्णः ।
८० **अमर्त्यकृत्**, दन्त्यसकारः ।
८१ **अमृतबीजम्**, वमिति अन्तस्थचतुर्थोनुस्वारसहितः ।
८२ **अमृताकर्षिणी**, (॰)अनुस्वारः पञ्चदशस्वरः ।
८३ **अमृताक्षः**, दन्त्यसकारः । वमिति अमृतबीजम् ।
८४ **अमृतादः**, टकारः चतुर्थवर्गप्रथमः ।
८५ **अमृताधरा**, (:) विसर्गः षोडशस्वरः ।
८६ **अमृताधारशायिनी**, ऐकारः द्वादशस्वरः ।
८७ **अमृतम्**, अकारः प्रथमस्वरः । लृकारः दशमस्वरः । एकारः एकादशस्वरः । ओकारस्त्रयोदशस्वरः । (:) विसर्गः षोडशस्वरः । जुमिति चवर्गतृतीयषष्ठस्वरबिन्दुयोगेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८८ **अमोघा,** ठकारः टवर्गद्वितीयः । लमिति भूबीजम् ।

८९ **अरियुक्,** लमिति भूबीजम् अन्तस्थतृतीयबिन्दुयोगेन ।

९० **अरुणा,** ङकारः कवर्गपञ्चमः । ठकारः टवर्गद्वितीयः । तकारः पञ्चमवर्गप्रथमः । हमिति व्योमबीजम् । ज्म्रींमिति चवर्गतृतीयपवर्गपञ्चमरेफदीर्घेकारबिन्दुयोगेन । य्म्क्ष्मूं अन्तस्थयकारपवर्गपञ्चमान्त्यक्षकारपवर्गपञ्चमदीर्घोकारबिन्दुयोगेन ।

९१ **अरुः,** नकारस्तवर्गपञ्चमः ।

९२ **अर्कबन्धुः,** घकारः कवर्गचतुर्थः ।

९३ **अर्कमण्डलः,** अकारः प्रथमस्वरः ।

९४ **अर्कः,** दीर्घ ॠकारः अष्टमस्वरः । ऌकारः नवमस्वरः । हमिति व्योमबीजम् ।

९५ **अर्घीशः,** दीर्घ ऊकारः षष्ठस्वरः । ऌकारः नवमस्वरः ।

९६ **अर्थः,** तालव्यशकारः ।

९७ **अर्धचन्द्रः,** टकारः चतुर्थवर्गप्रथमः ।

९८ **अर्धनारीश्वरः,** ढकारः टवर्गचतुर्थः ।

९९ **अर्धबन्धुकः,** ओकारस्त्रयोदशस्वरः ।

१०० **अर्धमात्रा,** (ः)विसर्गः षोडशस्वरः । एकारः एकादशस्वरः ।

१०१ **अर्धमात्रिका,** ॡकारः दशमः स्वरः ।

१०२ **अर्धचंः,** ॡकारः दशमः स्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०३ **अर्धेन्दुः,** (ं) शिरोबिन्दुः पञ्चदशस्वरः । (ः) विसर्गः षोडशस्वरः । टकारः चतुर्थवर्गप्रथमः ।

१०४ **अर्धः,** एकारः एकादशस्वरः । ङकारः कवर्गपञ्चमः ।

१०५ **अर्बुदः,** ऋकारः अष्टमस्वरः ।

१०६ **अर्यमा,** दीर्घ आकारः द्वितीयस्वरः ।

१०७ **अवनी,** ळकारः अन्तस्थतृतीयः ।

१०८ **अवलम्बिनी,** चकारस्तृतीयवर्गप्रथमः ।

१०९ **अवहारिता,** ळमिति भूबीजम् ।

११० **अवम्,** ञकारश्चवर्गपञ्चमः । वमिति अमृतबीजम् । झकारः चवर्गचतुर्थः । हमिति व्योमबीजम् ऊष्मचतुर्थबिन्दुयोगेन ।

१११ **अव्यक्तः,** नकारः तवर्गपञ्चमः ।

११२ **अव्ययः,** ॐ इति प्रणवः । (ं) अनुस्वारः पञ्चदशस्वरः ।

११३ **अश्मकः,** **नमः** हृदयबीजम् ।

११४ **अश्मरी,** **नमः** हृदयबीजम् ।

११५ **अश्मरीशः,** ओकारस्त्रयोदशस्वरः ।

११६ **अश्विनी,** दन्त्यसकारः ।

११७ **अश्वी,** अकारः प्रथमस्वरः ।

११८ **अश्वः,** (ः) विसर्गःषोडशस्वरः ।

११९ **अष्टकः,** टकारश्चतुर्थवर्गप्रथमः । दीर्घ ॠकारः अष्टमस्वरः । ऐकारः द्वादशस्वरोऽपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२० अष्टमी, दीर्घ ॠकारः अष्टमस्वरः ।
१२१ अष्टसिद्धिभूः, ॐ इति प्रणवः ।
१२२ अष्टाक्षरः, ॐ इति प्रणवः ।
१२३ अष्टाशब्दः, ॐ इति प्रणवः ।
१२४ असिता, लमिति भूबीजम् ।
१२५ असिताङ्गः, ह्रस्व इकारस्तृतीयस्वरः । जकारश्चवर्गतृतीयः ।
१२६ असितः, झकारश्चवर्गचतुर्थः ।
१२७ असिभीषणा, ओकारस्त्रयोदशस्वरः ।
१२८ असिः, झकारश्चवर्गचतुर्थः ।
१२९ असुरा, (:) विसर्गः षोडशस्वरः ।
१३० अस्त्रम्, फट् ।
१३१ अस्थिधातुः, तालव्यशकारः ।
१३२ अहस्करः, घकारः कवर्गचतुर्थः ।
१३३ अहंकाराकर्षिणी, ह्रस्व इकारस्तृतीयस्वरः ।
१३४ अहंकारः, फकारः पवर्गद्वितीयः । डकारष्टवर्गतृतीयः ।
१३५ अहम्, हमिति व्योमबीजम् ।

॥ इत्यकारः ॥

१३६ आकर्षणम्, वषट् शिखामन्त्रः ।
१३७ आकल्पितः, झकारश्चवर्गचतुर्थः ।
१३८ आकारः, अकारः प्रथमस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१३९ आकाशतरः, ङकारः कवर्गपञ्चमः ।
१४० आकाशम्, हमिति व्योमबीजम् । खकारः कवर्गद्वितीयः । गकारः कवर्गतृतीयः आं पाशबीजम् ।
१४१ आकाङ्क्षा, झकारश्चवर्गचतुर्थः । आकारः द्वितीयस्वरः ।
१४२ आकूतबीजम्, र म र ल म र क्ष इ ह स ई रेफमकाररकारलकारमकाररेफक्षकारह्रस्वेकारहकारदन्त्यसकारदीर्घेकारबिन्दुयोगेन ।
१४३ आकृतिः, झकारश्चवर्गचतुर्थः ।
१४४ आखण्डलः, लकारोऽन्तस्थतृतीयः ।
१४५ आगममालिनी, णकारः टवर्गपञ्चमः ।
१४६ आग्नेयः, यकारोऽन्तस्थप्रथमः । रकारोऽन्तस्थद्वितीयः ।
१४७ आज्ञाचक्रेश्वरः, क्षकारः अन्तिमवर्णः, क्षूसंयोगरूपः ।
१४८ आज्यपा, क्षकारः वर्णान्तिमः ।
१४९ आत्मकम्, पकारः पष्ठवर्गप्रथमः ।
१५० आत्मज्ञाना, ऐकारः द्वादशस्वरः ।
१५१ आत्मज्ञः, झकारः चवर्गचतुर्थः ।
१५२ आत्मबीजम्, अकारः प्रथमस्वरः ।
१५३ आत्ममुखी, टकारः चतुर्थवर्गप्रथमः ।
१५४ आत्मशक्तिः, चकारछकारजकाराः चवर्गप्रथमद्वितीयतृतीयाक्षररूपाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१५५ आत्मा, दीर्घ आकारः द्वितीयस्वरः । (०) पञ्चदशस्वरोऽनुस्वारूपः । हमिति व्योमबीजम् । दीर्घ ऊकारः षष्ठस्वरः । ह्सौरिति हकारसकारौकारचतुर्दशस्वरविसर्गयोगेन ।
१५६ आत्माकर्षिणी, ऐकारः द्वादशस्वरः । औकारः चतुर्दशस्वरः ।
१५७ आत्मानाम्निकः, ङकारः कवर्गपञ्चमः ।
१५८ आत्मान्तकेश्वरः, ह्रस्व ऋकारः सप्तमस्वरः ।
१५९ आत्मिकभूः, ओकारस्त्रयोदशस्वरः ।
१६० आत्मिका, दीर्घ ॠकारः अष्टमस्वरः ।
१६१ आदरसूः, दीर्घऊकारः षष्ठस्वरः ।
१६२ आदरः, (:)विसर्गरूपः षोडशस्वरः ।
१६३ आदित्यवर्णा, ठकारः टवर्गद्वितीयः ।
१६४ आदित्यः, ह्रस्व ऋकारः सप्तमस्वरः । ङकारः कवर्गपञ्चमः ।
१६५ आदिबिन्दुः, ङकारः कवर्गपञ्चमः ।
१६६ आदिबीजम्, ॐ इति प्रणवः ।
१६७ आदिभूता, ठकारः टवर्गद्वितीयः ।
१६८ आदिशक्तिभूः, (:)विसर्गरूपः षोडशस्वरः ।
१६९ आदिस्वरः, अकारः प्रथमस्वरः ।
१७० आदिः, ॐ इति प्रणवः । ककारः कवर्गप्रथमः ।
१७१ आद्या, जकारः चवर्गतृतीयः । टकारः चतुर्थवर्गप्रथमः ।
१७२ आद्याबीजम्, क्रीमिति ककाररकारदीर्घईकारबिन्दुयोगेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१७३ आद्यः, अकारः प्रथमस्वरः ।
१७४ आधारधामभूः, धकारः तवर्गचतुर्थः ।
१७५ आधारशक्तिः, एकारः एकादशस्वरः ।
१७६ आनन्दा, दीर्घ ॠकारः अष्टमस्वरः । ठकारः टवर्गद्वितीयः।
१७७ आनन्दाकर्षकः, ओकारः त्रयोदशस्वरः ।
१७८ आनन्दम्, डकारः टवर्गतृतीयः । हमिति व्योमबीजम् ।
१७९ आन्वीक्षिकी, जकारश्चवर्गतृतीयः ।
१८० आपसन्धिः, दीर्घ ऊकारः षष्ठस्वरः ।
१८१ आपूर्णम्,ह्रस्व ऋकारः सप्तमस्वरः ।
१८२ आपः, वमिति अमृतबीजम् अन्तस्थचतुर्थबिन्दुयोगेन ।
१८३ आप्ततमः, दीर्घ आकारः द्वितीयस्वरः ।
१८४ आप्तः, अकारः प्रथमस्वरः ।
१८५ आप्यायनी, ओकारस्त्रयोदशस्वरः ।
१८६ आमुक्तिः, थकारस्तवर्गद्वितीयः ।
१८७ आमोदा, झकारश्चवर्गचतुर्थः ।
१८८ आम्रातकेश्वरः, ह्रस्वऌकारः नवमस्वरः ।
१८९ आलापिनी, चकारस्तृतीयवर्गप्रथमः ।
१९० आह्लादिनी, दकारस्तवर्गतृतीयः ।
१९१ आशुगः, ढकारष्टवर्गचतुर्थः । णकारष्टवर्गपञ्चमः ।
१९२ आषाढीशः, णकारष्टवर्गपञ्चमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९३ आसिका, ऐकारः द्वादशस्वरः ।
१९४ आसुरः, मकारः पवर्गपञ्चमः ।
१९५ आस्यराट्, दीर्घ आकारः द्वितीयस्वरः।

॥ इत्याकारः ॥

१९६ इकारः, इः इति तृतीयस्वरः ।
१९७ इक्षुः, षकारः मूर्द्धन्यः ।
१९८ इच्छा, झकारश्चवर्गचतुर्थः ।
१९९ इरा, अन्तस्थयकारः ।
२०० इला, मूर्द्धन्यळकारः ।
२०१ इषुः, (ः) विसर्गः षोडशस्वरः ।

इति ह्रस्व इकारः ॥

२०२ ईकारः, श्रीमिति तालव्यशकाररेफचतुर्थस्वरबिन्दुयोगेन ।
२०३ ईशनेत्रम्, इकारस्तृतीयस्वरः ।
२०४ ईशानपतिः, ङकारः कवर्गपञ्चमः ।
२०५ ईशानवल्लभा, ह्रीमिति हकाररकारचतुर्थस्वरबिन्दुयोगेन ।
२०६ ईशानबीजम्, हमिति व्योमबीजम्, पञ्चदशस्वरसहितहकारः ।
२०७ ईशानी, दीर्घ ईकारश्चतुर्थस्वरः ।
२०८ ईशानः, (०) अनुस्वारः पञ्चदशस्वरो बिन्दुरूपः । हमिति व्योमबीजम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०९ ईशः, ह्रस्वऋकारः सप्तमस्वरः । दीर्घलृकारो दशमस्वरः (०) अनुस्वारः पञ्चदशस्वरः । हमिति व्योमबीजम् ।

२१० ईश्वरी, ढकारष्टवर्गचतुर्थः ।

२११ ईश्वरः, गकारः कवर्गतृतीयः । दीर्घ ऊकारः षष्ठस्वरः । दीः ईकारश्चतुर्थस्वरः । ओकारस्त्रयोदशस्वरः । नकारस्त वर्गपञ्चमः । पकारः पष्ठवर्गप्रथमः । मकारः पवर्ग पञ्चमः । दन्त्यसकारोऽपि ।

इति दीर्घ ईकारः ।

२१२ उकारः, उः इति पञ्चमस्वरः ।

२१३ उग्रकालः, मकारः पवर्गपञ्चमः ।

२१४ उग्रगन्धिकम्, ग्लौमिति कवर्गतृतीयान्तस्थलकारचतुर्दशस्वरबिन्दुयोगेन ।

२१५ उग्रभैरवी, ऐकारः द्वादशस्वरः ।

२१६ उग्रशूलधृक्, धकारस्तवर्गचतुर्थः ।

२१७ उग्रहासिनी, ह्रस्वलृकारः नवमस्वरः ।

२१८ उग्रा, दीर्घ आकारः द्वितीयस्वरः । ह्रस्वऋकारः सप्तमस्वरः । ककारखकारौ द्वितीयवर्गस्य प्रथमद्वितीयौ । भकारः पवर्गचतुर्थः । रमिति वह्निबीजम् ।

२१९ उग्रायुधः, खकारः कवर्गद्वितीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२२० उग्रः, उकारः पञ्चमस्वरः । (०) अनुस्वारः पञ्चदशस्वरः । टकारश्चतुर्थवर्गाद्यः ।

२२१ उच्चसंहर्त्ता, नकारस्तवर्गपञ्चमः ।

२२२ उच्चाटनम्, जकारश्चवर्गतृतीयः ।

२२३ उच्छूनकम्, छ्रींकारश्चर्गद्वितीयरेफदीर्घेकारबिन्दुयोगेन ।

२२४ उज्जयिनी, थकारस्तवर्गद्वितीयः ।

२२५ उज्जयिनीपतिः, थकारस्तवर्गद्वितीयः ।

२२६ उड्डीशेशः, पकारः षष्ठवर्गप्रथमः ।

२२७ उत्कारी, वकारः अन्तस्थचतुर्थः ।

२२८ उत्तमः, जकारश्चवर्गतृतीयः । टकारश्चतुर्थवर्गप्रथमः ।

२२९ उद्दजः, दीर्घ आकारः द्वितीयस्वरः ।

२३० उदरम्, मकारः पवर्गपञ्चमः ।

२३१ उद्दारकेशः, डकारष्टवर्गतृतीयः ।

२३२ उदितात्मा, ङकारः कवर्गपञ्चमः ।

२३३ उद्धारिणी, वकारः अन्तस्थचतुर्थः ।

२३४ उद्धारी, वकारः अन्तस्थचतुर्थः ।

२३५ उद्दाली, ञकारश्चवर्गपञ्चमः ।

२३६ उद्देश्यः, ओकारस्त्रयोदशस्वरः ।

२३७ उद्भिजरूपिणी, ओकारस्त्रयोदशस्वरः ।

२३८ उद्यानपदेश्वरी, मूर्द्धन्यळकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२३९ उन्नतिः, तकारः पञ्चमवर्गप्रथमः ।
२४० उन्मत्तभैरवी, ऐकारः द्वादशस्वरः ।
२४१ उन्मत्तभैरवः, ऌकारः नवमस्वरः । ङकारः कवर्गपञ्चमः ।
२४२ उन्मत्तः, ऐकारः द्वादशस्वरः । सकारः दन्त्यरूपः ।
२४३ उन्मादनम्, सः विसर्गसहितदन्त्यसकारः ।
२४४ उन्मादिकः, घकारः कवर्गचतुर्थः
२४५ उन्मादिनी, दीर्घ ईकारश्चतुर्थस्वरः । दीर्घॡकारः दशमस्वरः । छकारश्चवर्गद्वितीयः ।
२४६ उपधात्मिका, औकारश्चतुर्दशस्वरः
२४७ उपध्वानिः, डकारष्टवर्गतृतीयः ।
२४८ उपलम्, क्रूं बीजम् ककाररेफदीर्घोकारबिन्दुसहितमिति ।
२४९ उपशान्तिकृत्, दीर्घॡकारः दशमस्वरः ।
२५० उपस्थाना, चकारस्तृतीयवर्गप्रथमः ।
२५१ उपस्थः, मकारः पवर्गपञ्चमः ।
२५२ उपहारकः, पकारः षष्ठवर्गप्रथमः ।
२५३ उपान्त्यः, मूर्द्धन्यळकारः ।
२५४ उभयदः, ॐ इति प्रणवः ।
२५५ उमा, ह्रस्व इकारस्तृतीयस्वरः । ह्रस्व उकारः पञ्चमस्वरः । (ः) विसर्गरूपः षोडशस्वरः । खकारः कवर्गद्वितीयः । दकारस्तवर्गतृतीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२५६ उमाकान्तः, णकारष्टवर्गपञ्चमः ।
२५७ उमेशः, दीर्घ आकारः द्वितीयस्वरः ।
२५८ उरगः, दकारस्तवर्गतृतीयः ।
२५९ उरोजः, जकारश्चवर्गतृतीयः ।
२६० उरोरुहः, जकारश्चवर्गतृतीयः ।
२६१ उर्वशी, दीर्घ आकारः द्वितीयस्वरः ।
२६२ उल्कामुखी, औकारश्चतुर्दशस्वरः ।
२६३ उशना, व्रौमिति वकाररकारौकारविन्दुयोगेन ।
२६४ उष्णरश्मिः, औकारश्चतुर्दशस्वरः ।

इति ह्रस्वोकारः ।

२६५ ऊकारान्तः, ह्रस्व ऋकारः सप्तमस्वरः ।
२६६ ऊकारः, ऊः इति षष्ठस्वरः ।
२६७ ऊरुद्वयात्मकः, तकारः पञ्चमवर्गप्रथमः ।
२६८ ऊरुमूलम्, तकारः पञ्चमवर्गप्रथमः ।
२६९ ऊर्ध्वकेशिनी, ह्रस्व उकारः पञ्चमस्वरः । झकारश्चवर्गचतुर्थः । गकारः कवर्गतृतीयः । दीर्घ ऊकारः षष्ठस्वरः ।
२७० ऊर्ध्वकेशी, एकारः एकादशस्वरः ।
२७१ ऊर्ध्वगः, एकारः एकादशस्वरः ।
२७२ ऊर्ध्वदन्तः, एकारः एकादशस्वरः । ओकारस्त्रयोदशस्वरः ।
२७३ ऊर्ध्वबीजम्, ऐकारः द्वादशस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२७४ ऊर्ध्वमातृका, औं: इति बिन्दुविसर्गयुक्तचतुर्दशस्वरः ।
२७५ ऊर्ध्वमुखी, तकारः पञ्चमवर्गप्रथमः ।
२७६ ऊर्ध्वमुखम्, (०) अनुस्वारः पञ्चदशस्वरः ।
२७७ ऊर्ध्वमूर्तिः, दीर्घॠकारः अष्टमस्वरः ।
२७८ ऊर्ध्ववापी, नकारस्तवर्गपञ्चमः ।
२७९ ऊर्ध्वोष्ठः, एकारः एकादशस्वरः । ओकारस्त्रयोदशस्वरः ।
२८० ऊर्मिः, प्लूमिति षष्ठवर्गादिमान्तस्थतृतीयषष्ठस्वरबिन्दुयोगेन
अर्थात् पकारलकारदीर्घोकारबिन्दुरूपम् ।
२८१ ऊर्मी, बकारः पवर्गतृतीयः ।
२८२ ऊषा, ञकारश्चवर्गपञ्चमः ।
२८३ ऊष्मा, रकारः अन्तस्थद्वितीयः ।
२८४ ऊष्मादः, दीर्घ ऊकारः षष्ठस्वरः ।

इतिदीर्घोकारः ।

२८५ ऋकारः, ऋ इति सप्तमस्वरः ।
२८६ ऋक्प्रदा, ञकारश्चवर्गपञ्चमः ।
२८७ ऋक्ष्यः, ह्रस्वःअकारः प्रथमस्वरः ।
२८८ ऋच्छम्, त्रौं तकाररकारौकारबिन्दुयोगेन ।
२८९ ऋद्धिदा, एकारः एकादशस्वरः ।
२९० ऋद्धिराट्, ह्रस्व ऋकारः सप्तमस्वरः ।
२९१ ऋद्धिः, ह्रस्व उकारः पञ्चमस्वरः । ह्रस्वऋकारःसप्तमस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्रस्वऌकारः नवमस्वरः । **कखौ** कवर्गप्रथमद्वितीयौ ।
ढकारष्टवर्गचतुर्थः । लकारः अन्तस्थतृतीयः ।

२९२ **ऋषिसूदनः**, ह्रस्वऋकारःसप्तमस्वरः ।
२९३ **ऋषीश्वरः**, दीर्घऊकारः षष्ठस्वरः ।
२९४ **ऋष्या**, ह्रस्वऋकारः सप्तमस्वरः ।

इति ह्रस्वऋकारः ।

२९५ **ॠकारः**, ॠ इत्यष्टमस्वरः ।

इति दीर्घॠकारः ।

२९६ **ऌकारः**, ऌ इति नवमस्वरः ।

इति ह्रस्वऌकारः ।

२९७ **ॡषिका**, ॡकारः दशमस्वरः ।

इति दीर्घॡकारः ।

२९८ **एककर्तरी**, जकारश्चवर्गतृतीयः ।
२९९ **एककृत्**, झकारश्चवर्गचतुर्थः ।
३०० **एकदन्तः**, दीर्घॠकारः अष्टमस्वरः । ह्रस्वऌकारः नवमस्वरः ।
३०१ **एकदंष्ट्रकः**, एकारः एकादशस्वरः ।
३०२ **एकनेत्रम्**, ङकारः कवर्गपञ्चमः ।
३०३ **एकनेत्रान्तः**, जकारश्चवर्गतृतीयः ।
३०४ **एकनेत्रेश्वरः**, छकारश्चवर्गाद्वितीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३०५ एकपात्, ह्रस्वऋकारः सप्तमस्वरः। एकारः एकादशस्वरः। ङकारः कवर्गपञ्चमः।

३०६ एकपादः, छकारश्चवर्गद्वितीयः। ञकारश्चवर्गपञ्चमः। ठकार डकारौ चतुर्थवर्गद्वितीयतृतीयौ।

३०७ एकबुद्बुदः, (०)अनुस्वारः पञ्चदशस्वरः।

३०८ एकमात्रा, दीर्घ ऊकारः षष्ठस्वरः।

३०९ एकमात्रः, ह्रस्वःअकारः प्रथमस्वरः।

३१० एकरुद्रः, औकारश्चतुर्दशस्वरः। ङकारः कवर्गपञ्चमः।

३११ एकरूपः, चकारस्तृतीयवर्गाद्यः।

३१२ एकवामः, छकारश्चवर्गद्वितीयः।

३१३ एका, जकारश्चवर्गतृतीयः।

३१४ एकादशी, एकारः एकादशस्वरः।

३१५ एकाम्रपीठिका, दीर्घलृकारः दशमस्वरः।

३१६ एकाम्रः, दीर्घलृकारः दशमस्वरः।

३१७ एकाङ्घ्रिः, ह्रस्वलृकारः नवमस्वरः।

३१८ एकः, ॐ इति प्रणवः। ओकारस्त्रयोदशस्वरः।

३१९ एलापुरनिवासिनी, ढकारष्टवर्गचतुर्थः।

३२० एलापुरः, ढकारष्टवर्गचतुर्थः।

इत्येकारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३२१ **ऐकारः,** ऐ इति द्वादशस्वरः ।

३२२ **ऐरावतः,** ऐकारः द्वादशस्वरः ।

३२३ **ऐश्वरी,** ढकारष्टवर्गचतुर्थः ।

३२४ **ऐश्वर्या,** ऐकारः द्वादशस्वरः ।

इत्यैकारः ।

३२५ **ओष्ठनामा,** ओकारस्त्रयोदशस्वरः ।

३२६ **ओष्ठम्,** एकारः एकादशस्वरः ।

इत्योकारः ।

३२७ **औदार्यः,** औकारश्चतुर्दशस्वरः ।

३२८ **औरसः,** औकारश्चतुर्दशस्वरः ।

३२९ **औषधात्मिका,** औकारश्चतुर्दशस्वरः ।

इत्यौकारः ।

३३० **अङ्कुशजः,** दीर्घॠकारः अष्टमस्वरः ।

३३१ **अङ्कुशी,** ञकारश्चवर्गपञ्चमः ।

३३२ **अङ्कुशम्,** दीर्घ ईकारश्चतुर्थस्वरः । क्रोमिति ककाररकारत्रयोदशस्वरबिन्दुयोगेन ।

३३३ **अङ्कुशः,** झकारश्चवर्गचतुर्थः ।

३३४ **अङ्गदः,** औकारश्चतुर्दशस्वरः ।

३३५ **अङ्गिराः,** एकारः एकादशस्वरः । ऐकारः द्वादशस्वरः ।

३३६ **अङ्गुलिः,** ञकारश्चवर्गपञ्चमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३३७ **अङ्गुलीमूलम्**, **घ**कारः कवर्गचतुर्थः ।
३३८ **अङ्गुष्ठम्**, **आ**कारः द्वितीयस्वरः ।
३३९ **अञ्जनी**, **ड**कारष्टवर्गतृतीयः ।
३४० **अञ्जनम्**, **ङ**कारः कवर्गपञ्चमः । **ज**कारश्चवर्गतृतीयः ।
३४१ **अन्तकः**, **ग**कारः कवर्गतृतीयः । **क**कारः द्वितीयवर्गादिमः । **म**कारः पवर्गपञ्चमः । **ण**कारष्टवर्गपञ्चमः । **ष**कारः मूर्द्धन्यः ।
३४२ **अन्तविता**, **न**कारस्तवर्गपञ्चमः ।
३४३ **अन्तस्थिता**, **ऋ**कारः सप्तमस्वरः ।
३४४ **अन्तिकम्**, **क**कारः द्वितीयवर्गादिमः ।
३४५ **अन्तिमस्वरः**, (**:**) विसर्गः षोडशस्वरः ।
३४६ **अन्तिमः**, **क्ष**कारः अन्तिमवर्णः । **ए**कारः एकादशस्वरः ।
३४७ **अन्तम्**, **म**कारः पवर्गपञ्चमः ।
३४८ **अन्त्यबाणः**, **सः** इति दन्त्यो विसर्गसहितः ।
३४९ **अन्धकारिणी**, **ओ**कारस्त्रयोदशस्वरः ।
३५० **अन्धकारः**, **ङ**कारः कवर्गपञ्चमः ।
३५१ **अम्बरम्**, दीर्घ **आ**कारः द्वितीयस्वरः । **ह्सौ**मिति हकारसकारौकारबिन्दुयोगेन ।
३५२ **अम्बा**, **ऋ**कारः अष्टमस्वरः । **ॡ**कारः दशमस्वरः । (**०**) अनुस्वारः पञ्चदशस्वरः ।
३५३ **अम्बिका**, **ध**कारस्तवर्गचतुर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३५४ **अम्बु,** वमिति अमृतबीजम् अन्तस्थचतुर्थबिन्दुयोगेन ।

३५५ **अम्बुजन्मा,** ऋकारः सप्तमस्वरः ।

३५६ **अम्बुजम्,** ठकारष्टवर्गद्वितीयः ।

३५७ **अम्बुदः,** दीर्घॠकारः अष्टमस्वरः । वमिति अमृतबीजम् ।

३५८ **अम्बुधिः,** दीर्घ आकारः द्वितीयस्वरः । थकारस्तवर्गद्वितीयः ।

३५९ **अम्बुभृत्,** वमिति अमृतबीजम् ।

३६० **अम्बुसूः,** दीर्घॠकारः अष्टमस्वरः ।

३६१ **अम्भोजम्,** ठकारष्टवर्गद्वितीयः ।

३६२ **अंशुकम्,** ह्सौमिति हकारदन्त्यसकारचतुर्दशस्वरबिन्दुयोगेन ।

३६३ **अंशुमान्,** ऐकारः द्वादशस्वरः । अकारः प्रथमस्वरः ।

३६४ **अंशुः,** उकारः पञ्चमस्वरः ।

३६५ **आन्तः,** ह्रस्व इकारस्तृतीयस्वरः ।

३६६ **इन्दिरा,** दीर्घॡकारः दशमस्वरः ।

३६७ **इन्दुः,** दीर्घॡकारः दशमस्वरः । (०) अनुस्वारः पञ्चदशस्वरः । वमिति अमृतबीजम् । दन्त्यसकारः । द्रां इति तवर्गतृतीयरेफद्वितीयस्वरबिन्दुयोगेन ।

३६८ **इन्द्रचापः,** दीर्घ ऊकारः षष्ठस्वरः ।

३६९ **इन्द्रधनुः,** झकारश्चवर्गचतुर्थः ।

३७० **इन्द्रबीजम्,** इकारस्तृतीयस्वरः । पञ्चदशस्वरसहितोऽन्तस्थलकारोऽपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३७१ इन्द्रसूः, इकारस्तृतीयस्वरः ।

३७२ इन्द्राक्षी, षकारः षष्ठवर्गप्रथमः ।

३७३ इन्द्राणी, इकारस्तृतीयस्वरः। ऐकारः द्वादशस्वरः । चकारस्तृतीयवर्गप्रथमः । षकारः षष्ठवर्गप्रथमः ।

३७४ इन्द्रादिः, ॐ इति प्रणवः ।

३७५ इन्द्रियम्, खकारः कवर्गद्वितीयः ।

३७६ इन्द्रः, ऐकारः द्वादशस्वरः । ळं पञ्चदशस्वरसहितोऽन्तस्थलकारः बिन्दुरहितोऽपि । ह्रस्वऌकारः नवमस्वरः ।

३७७ इन्धिका, उकारः पञ्चमस्वरः ।

३७८ ऐन्दवी, दीर्घ ईकारश्चतुर्थस्वरः ।

३७९ ऐन्दवम्, दीर्घ ऊकारः षष्ठस्वरः ।

३८० ओंकारपीठगः, खकारः कवर्गद्वितीयः ।

३८१ ओंकारः, प्रणवस्तारः ।

इत्यनुस्वारः ।

इति श्रीवर्णबीजप्रकाशेऽवर्गप्रकाशः प्रथमः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ कवर्गप्रकाशः २.

१ ककुत्, लकारः अन्तस्थतृतीयः । वकारः अन्तस्थचतुर्थः ।
२ ककुद्रजः, लकारः अन्तस्थतृतीयः ।
३ ककूक्तिः, फकारः द्वितीयवर्गाद्यः ।
४ कचबीजम्, दीर्घ ऊकारः षष्टस्वरः ।
५ कचसूः, ह्रस्वः अकारः प्रथमस्वरः ।
६ कच्छपः, फकारः पवर्गद्वितीयः ।
७ कटिः, टकारश्चतुर्थवर्गप्रथमः । तकारः पञ्चमवर्गप्रथमः ।
८ कटुकपत्रा, ह्रस्वऌकारः नवमस्वरः ।
९ कटुः, ह्रस्व इकारस्तृतीयस्वरः ।
१० कदा, घकारः कवर्गचतुर्थः ।
११ कन्या, (०) बिन्दुरूपः अनुस्वारः पञ्चदशस्वरः ।
१२ कन्यास्तनानिभः, (ः) विसर्गरूपः अः षोडशस्वरः ।
१३ कपर्दिनी, दीर्घॠकारः अष्टमस्वरः । बकारः पवर्गतृतीयः ।
भकारः पवर्गचतुर्थः ।
१४ कपर्दी, ऐकारः द्वादशस्वरः । ओकारस्त्रयोदशस्वरः । पकारः
षष्ठवर्गप्रथमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१५ **कपालिनी,** दीर्घ ऊकारः षष्ठस्वरः । (:)विसर्गः षोडशस्वरः । ककारः द्वितीयवर्गप्रथमः । ङकारः कवर्गपञ्चमः ।

१६ **कपाली,** एकारः एकादशस्वरः । कृकारखकारौ द्वितीयवर्गप्रथमद्वितीयौ । घकारः कवर्गचतुर्थः । टकारठकारौ चतुर्थवर्गप्रथमद्वितीयौ ।

१७ **कपालः,** ह्रस्वऌकारः नवमस्वरः ।

१८ **कपिललोचना,** टकारश्चतुर्थवर्गप्रथमः ।

१९ **कपिला,** टकारश्चतुर्थवर्गप्रथमः । यकारोऽन्तस्थप्रथमः ।

२० **कपिली,** टकारश्चतुर्थवर्गप्रथमः ।

२१ **कपीश्वरः,** खकारः कवर्गद्वितीयः ।

२२ **कफोणा,** खकारः कवर्गद्वितीयः ।

२३ **कमठः,** फकारः पवर्गद्वितीयः ।

२४ **कमनुः,** खकारः कवर्गद्वितीयः ।

२५ **कमलप्रिया,** ह्रस्व उकारः पञ्चमस्वरः ।

२६ **कमला,** ह्रस्व इकारस्तृतीयस्वरः । ह्रस्व उकारः पञ्चमस्वरः । दीर्घऌकारः दशमस्वरः । ककारखकारौ द्वितीयवर्गस्य प्रथमद्वितीयौ । श्रीमिति तालव्यशकाररेफचतुर्थस्वरबिन्दुयोगेन ।

२७ **कमलाक्षी,** स्त्रीमिति दन्त्यसकारतकाररेफचतुर्थस्वरबिन्दुयोगेन ।

२८ **कमलावती,** चकारस्तृतीयवर्गादिमः ।

२९ **कमलावेशः,** ह्रस्व उकारः पञ्चमस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३० **कमण्डलुः**, ठकारष्टवर्गद्वितीयः ।
३१ **करका**, क्रूमिति ककाररकारदीर्घोकारबिन्दुयोगेन ।
३२ **करतलः**, ठकारष्टवर्गद्वितीयः ।
३३ **करमूलम्**, वकारः अन्तस्थचतुर्थः ।
३४ **करादिगः**, ककारः द्वितीयवर्गादिमः ।
३५ **कराला**, औकारश्चतुर्दशस्वरः ।
३६ **करालिनी**, दीर्घ आकारः द्वितीयस्वरः। ह्रस्व इकारस्तृतीयस्वरः। दीर्घॡकारः दशमस्वरः। (०) अनुस्वारः पञ्चदशस्वरः ।
३७ **कराली**, गकारः कवर्गतृतीयः ।
३८ **करालः**, दीर्घ आकारः द्वितीयस्वरः । घकारः कवर्गचतुर्थः ।
३९ **करिणी**, ठकारष्टवर्गद्वितीयः ।
४० **करुणा**, खकारः कवर्गद्वितीयः । जकारश्चवर्गतृतीयः । ह्रींङ्कारोऽपि हकाररेफचतुर्थस्वरबिन्दुयोगेन ।
४१ **करुणाकरा**, ह्रस्व उकारः पञ्चमस्वरः ।
४२ **करुणः**, वकारः अन्तस्थचतुर्थः ।
४३ **करः**, (०) बिन्दुरूपः पञ्चदशस्वरः । ककारः द्वितीयवर्गादिमः ।
४४ **कर्कटः**, फकारः पवर्गद्वितीयः ।
४५ **कर्कशात्मा**, ञकारश्चवर्गपञ्चमः ।
४६ **कर्णदक्षः**, ह्रस्व उकारः पञ्चमस्वरः ।
४७ **करणः**, ह्रस्व उकारः पञ्चमस्वरः । औकारश्चतुर्दशस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४८ **कर्पूरान्तः,** गकारः कवर्गतृतीयः ।

४९ **कर्बुरा,** ककारः द्वितीयवर्गादिमः ।

५० **कर्मजम्,** छकारश्चवर्गद्वितीयः ।

५१ **कर्मसाक्षी,** दीर्घल्ृकारः दशमस्वरः ।

५२ **कार्षिणी,** दीर्घ आकारः द्वितीयस्वरः ।

५३ **कलकण्ठा,** मूर्द्धन्यषकारः ।

५४ **कलकण्ठः,** दन्त्यसकारः ।

५५ **कलत्रम्,** छकारश्चवर्गद्वितीयः । दकारस्तवर्गतृतीयः ।

५६ **कलभा,** दन्त्यसकारः ।

५७ **कलशः,** मकारः पवर्गपञ्चमः । वकारोन्तस्थचतुर्थः ।

५८ **कलहप्रिया,** जकारश्चवर्गतृतीयः ।

५९ **कलहंसप्रिया,** झकारश्चवर्गचतुर्थः ।

६० **कला,** दीर्घ ईकारः चतुर्थस्वरः । (ः) षोडशस्वरो विसर्गोऽपि। ककारो द्वितीयवर्गाद्यः । ह्रींमिति मायाबीजम् ।

६१ **कलात्मा,** ठकारष्टवर्गद्वितीयः ।

६२ **कलानिधिः,** (०) अनुस्वारः पञ्चदशस्वरः ।

६३ **कलामयी,** दीर्घ ईकारश्चतुर्थस्वरः ।

६४ **कलावती,** दीर्घऋकारोऽष्टमस्वरः । ककारो द्वितीयवर्गादिमः । चकारस्तृतीयवर्गादिमः ।

६५ **कलाशक्तिः,** ककारो द्वितीयवर्गादिमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६६ **कलिका,** हकारो व्योमबीजम् ऊष्मान्त्यः ।
६७ **कलम्,** ककारो द्वितीयवर्गादिमः ।
६८ **कल्पना,** एकारः एकादशस्वरः ।
६९ **कल्पलता,** ह्रस्वऋकारः सप्तमस्वरः ।
७० **कल्पान्तः,** ऋकारः सप्तमस्वरः । छकारश्चवर्गद्वितीयः । ध्रुं बीजम् तवर्गचतुर्थरेफपञ्चमस्वरबिन्दुयोगेन ।
७१ **कल्मषा,** ह्रस्वऌकारो नवमस्वरः ।
७२ **कल्मषम्,** ह्रस्वऋकारःसप्तमस्वरः ।
७३ **कल्याणी,** ककारखकारौ द्वितीयवर्गप्रथमद्वितीयौ ।
७४ **कल्याणम्,** तालव्यशकारः अयमेव बिन्दुसहितोऽपि ।
७५ **कवचम्,** हुमिति हकारपञ्चमस्वरबिन्दुयोगेन ।
७६ **कवलकम्,** ककारो द्वितीयवर्गाद्यः ।
७७ **कविबीजम्,** ब्रोमिति पवर्गतृतीयरकारत्रयोदशस्वरबिन्दुयोगेन ।
७८ **कविः,** हकार ऊष्मान्तिमो व्योमबीजम् ।
७९ **कवोस्कः,** हकारो व्योमबीजम् ।
८० **कव्यवहा,** क्षकारो वर्णान्तिमः ।
८१ **काकिनी,** ओकारस्त्रयोदशस्वरः ।
८२ **काकोदरी,** तकारः पञ्चमवर्गाद्यः ।
८३ **काकोदरः,** दकारस्तवर्गतृतीयः ।
८४ **कात्यायनी,** दकारस्तवर्गतृतीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८५ **कान्यकुब्जकः**, दीर्घ ऊकारः षष्ठस्वरः ।

८६ **कान्यकुब्जभूः**, दीर्घ ऊकारः षष्ठस्वरः ।

८७ **कामकूटम्**, ऐकारो द्वादशस्वरः ।

८८ **कामगुह्यकः**, (ः)विसर्गरूपः षोडशस्वरः ।

८९ **कामगोलकः**, ह्रस्व उकारः पञ्चमस्वरः ।

९० **कामगः**, ककारो द्वितीयवर्गादिमः ।

९१ **कामघ्नः**, ह्रस्व उकारः पञ्चमस्वरः ।

९२ **कामचारविहारिणी**, छकारश्चवर्गद्वितीयः ।

९३ **कामचारः**, दीर्घ ऊकारः षष्ठस्वरः ।

९४ **कामदा**, ककारो द्वितीयवर्गादिमः । छकारश्चवर्गद्वितीयः ।

९५ **कामदः**, दीर्घ आकारः द्वितीयस्वरः ।

९६ **कामधुक्**, षकारो मूर्द्धन्यः ।

९७ **कामधूमकः**, षकारो मूर्द्धन्यः ।

९८ **कामधेनुः**, क्लीमिति ककारचतुर्थस्वरबिन्दुयोगेन ।

९९ **कामध्वजा**, दीर्घलृकारः दशमस्वरः ।

१०० **कामप्रिया**, ङकारः कवर्गपञ्चमः ।

१०१ **काममाता**, छकारश्चवर्गद्वितीयः ।

१०२ **कामराजः**, दीर्घ आकारः द्वितीयस्वरः । क्लीमिति ककारलका[र]
दीर्घेकारबिन्दुयोगेन ।

१०३ **कामरूपिणी**, ककारो द्वितीयवर्गादिमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०४ **कामरूपी,** खकारः कवर्गद्वितीयः । घकारः कवर्गचतुर्थः । तालव्यशकारः ।

१०५ **कामरूपः,** ह्रस्वः अकारः प्रथमस्वरः । एकार एकादशस्वरः । ककारो द्वितीयवर्गादिमः । तालव्यशकारोऽपि ।

१०६ **कामवर्धनः,** ह्रस्वलृकारः नवमस्वरः ।

१०७ **कामाकर्षिणी,** ह्रस्वः अकारः प्रथमस्वरः ।

१०८ **कामास्त्रम्,** ह्रींकारः हकाररकारदीर्घेकारबिन्दुयोगेन ।

१०९ **कामास्यः,** घकारः कवर्गचतुर्थः ।

११० **कामिका,** ककारो द्वितीयवर्गाद्यः । तकारः पञ्चमवर्गाद्यः ।

१११ **कामिनी,** ह्रस्वः अकारः प्रथमस्वरः । ह्रस्व इकारः तृतीयस्वरः । ककारखकारगकाराः कवर्गप्रथमद्वितीयतृतीयाः ।

११२ **कामिनीमध्यवर्तकः,** तकारः पञ्चमवर्गाद्यः ।

११३ **कामी,** ह्रस्वऋकारः सप्तमस्वरः । तकारः पञ्चमवर्गादिमः ।

११४ **कामेशी,** अकारः प्रथमस्वरः । **क्ल्ह्रीम्** ककारलकारमायाबीजरूपमिति ।

११५ **कामेश्वरी,** ह्रस्वः अकारः प्रथमस्वरः । खकारः कवर्गद्वितीयः । ङकारः कवर्गपञ्चमः । **क्ल्ह्रीम्** ककारलकारमायाबीजमिति ।

११६ **कामोदरी,** तकारः पञ्चमवर्गाद्यः ।

११७ **कामः,** ह्रस्वः अकारः प्रथमस्वरः । ह्रस्व इकारस्तृतीयस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्रस्व उकारः पञ्चमस्वरः । (०) अनुस्वारःपञ्चदशस्वरः
ककारो द्वितीयवर्गादिमः । क्षकारो वर्णान्तिमः । क्लीमिति
ककारलकारदीर्घेकारबिन्दुयोगेन ।

११८ कांम्या, घकारः कवर्गचतुर्थः ।

११९ कायिनी, झकारश्चवर्गचतुर्थः ।

१२० कारखाग्निः, खकारः कवर्गद्वितीयः ।

१२१ कार्त्तवीर्यार्जुनः, फ्रोमिति फकाररकारत्रयोदशस्वरबिन्दुयोगेन।

१२२ कार्त्तिकेयः, ङकारः कवर्गपञ्चमः ।

१२३ कार्मुकम्, दीर्घऋकारोऽष्टमस्वरः ।

१२४ कार्षिकः, दीर्घऋकारोऽष्टमस्वरः ।

१२५ कालकर्षिणी, ऐकारो द्वादशस्वरः ।

१२६ कालकल्पा, चकारस्तृतीयवर्गाद्यः ।

१२७ कालकारिका, दीर्घ ईकारश्चतुर्थस्वरः ।

१२८ कालकूटा, ह्रस्व उकारः पञ्चमस्वरः । ओकारस्त्रयोदशस्वरः

२२९ कालकृष्णः, षकारो मूर्द्धन्यः ।

१३० कालजिह्वा, दीर्घ आकारो द्वितीयस्वरः । मूर्द्धन्यळकारः
अन्तिमक्षकारोऽपि ।

१३१ कालनिशा दीर्घ आकारो द्वितीयस्वरः ।

१३२ कालपोता, ञकारश्चवर्गपञ्चमः ।

१३३ कालबीजम्, ञकारश्चवर्गपञ्चमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१३४ **कालभद्रः,** मकारः पवर्गपञ्चमः ।

१३५ **कालभैरवी,** दीर्घ आकारो द्वितीयस्वरः ।

१३६ **कालरात्री,** ह्रस्वः अकारः प्रथमस्वरः । दीर्घऌकारो दशमस्वरः । ऐकारो द्वादशस्वरः । औकारश्चतुर्दशस्वरः । ककारो द्वितीयवर्गप्रथमः । छकारश्चवर्गद्वितीयः । पकारफकारौ षष्ठवर्गप्रथमद्वितीयौ । रकारोन्तस्थद्वितीयः । ह्रमिति हकाररकारपञ्चदशस्वरयोगेन ।

१३७ **कालरूपा,** गकारः कवर्गतृतीयः ।

१३८ **कालरूपी,** खकारः कवर्गद्वितीयः ।

१३९ **कालरूपः,** घकारः कवर्गचतुर्थः ।

१४० **कालवक्रा,** ह्रस्व उकारः पञ्चमस्वरः ।

१४१ **कालसंकर्षा,** खकारः कवर्गद्वितीयः ।

१४२ **कालसुन्दरी** (०)अनुस्वारः पञ्चदशस्वरः ।

१४३ **कालाग्निः,** ककारो द्वितीयवर्गाद्यः । ह्स्रौमिति हकारसकाररकारचतुर्दशस्वरबिन्दुयोगेन ।

१४४ **कालादिः,** भकारः पवर्गचतुर्थः ।

१४५ **कालानलः,** हूमिति हकारदीर्घोकारबिन्दुयोगेन ।

१४६ **कालिका,** दीर्घऋकारोऽष्टमस्वरः । क्रींमिति ककाररकारदीर्घेकारबिन्दुयोगेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१४७ काली, ह्रस्वः अकारः प्रथमस्वरः । ककारखकारौ द्वितीयवर्गः प्रथमद्वितीयौ । ङकारः कवर्गपञ्चमः । क्रीमपि ककाररकारः दीर्घेकारबिन्दुयोगेन ।

१४८ कालेशः, मकारः पवर्गपञ्चमः ।

१४९ कालेश्वरपीठोपसेवनः, णकारष्टवर्गपञ्चमः ।

१५० कालान्तकः, ह्रस्व उकारः पञ्चमस्वरः ।

१५१ कालः, दीर्घ ॡकारो दशमस्वरः । (:) विसर्गः षोडशस्वरः । खकारः कवर्गद्वितीयः । छकारश्चवर्गद्वितीयः । झकारश्चवर्ग चतुर्थः । ञकारश्चवर्गपञ्चमः । नकारस्तवर्गपञ्चमः । मकारः पवर्गपञ्चमः । षकारो मूर्द्धन्यः । क्षकारोऽन्तिमवर्णः । हूमिति हकारदीर्घौकारबिन्दुयोतेन ।

१५२ काव्यम्, भ्रोमिति पवर्गचतुर्थरेफत्रयोदशस्वरबिन्दुसहितमिति ।

१५३ काशिका, दीर्घ आकारो द्वितीयस्वरः ।

१५४ काष्ठा, टकारश्चतुर्थवर्गप्रथमः ।

१५५ काष्ठारूपा, घकारः कवर्गचतुर्थः ।

१५६ किल्बिषम्, ह्रस्व ऋकारः सप्तमस्वरः ।

१५७ कीनाशः, ञकारश्चवर्गपञ्चमः ।

१५८ कीर्तिः, ह्रस्वः अकारः प्रथमस्वरः । दीर्घ ईकारश्चतुर्थस्वरः । दीर्घऋकारोऽष्टमस्वरः । एकारः एकादशस्वरः । घकारः कवर्गचतुर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१५९ **कुक्कुटी,** ङकारः कवर्गपञ्चमः ।
१६० **कुक्षिः,** झकारश्चवर्गचतुर्थः । षकारः षष्ठवर्गादिमः ।
१६१ **कुचः,** जकारश्चवर्गचतुर्थः ।
१६२ **कुज्ञानी,** ञकारश्चवर्गपञ्चमः ।
१६३ **कुटिला,** टकारश्चतुर्थवर्गप्रथमः दकारस्तवर्गतृतीयः ।
१६४ **कुटिलः,** ह्रस्व उकारः पञ्चमस्वरः । लकारोऽन्तस्थतृतीयः ।
१६५ **कुत्सनः,** ककारो द्वितीयवर्गप्रथमः ।
१६६ **कुत्सितावेषः,** ककारो द्वितीयवर्गप्रथमः ।
१६७ **कुबेरहक्,** दीर्घलृकारो दशमस्वरः ।
१६८ **कुबेरबीजम्,** समिति दन्त्यसकारपञ्चदशस्वरयोगेन ।
१६९ **कुबेरः,** दकारस्तवर्गतृतीयः ।
१७० **कुब्जा,** (०)अनुस्वारः पञ्चदशस्वरः ।
१७१ **कुब्जाभा,** छकारश्चवर्गद्वितीयः ।
१७२ **कुब्जिनी,** नकारस्तवर्गपञ्चमः ।
१७३ **कुब्जः,** (०)अनुस्वारः पञ्चदशस्वरः ।
१७४ **कुमारः,** ङकारः कवर्गपञ्चमः तालव्यशकारः ।
१७५ **कुरुकुल्ला,** ह्रस्वः अकारः प्रथमस्वरः । ऐकारो द्वादशस्वरः ।
१७६ **कुरङ्गाक्षी,** दीर्घ आकारो द्वितीयस्वरः। स्त्रीमिति दन्त्यसकारतकाररकारदीर्घेकारबिन्दुसहितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१७७ **कुलकौलिनी,** तालव्यशकारः ।

१७८ **कुलनायकः,** ह्रस्वऋकारः सप्तमस्वरः ।

१७९ **कुलमार्गस्थितः,** खकारः कवर्गद्वितीयः ।

१८० **कुलमालिनी,** ककारो द्वितीयवर्गादिमः ।

१८१ **कुलशालिनी,** ठकारष्टवर्गद्वितीयः ।

१८२ **कुलसुन्दरी,** ह्रस्वऌकारो नवमस्वरः । घकारः कवर्गचतुर्थः।

१८३ **कुलाचलः,** एकार एकादशस्वरः ।

१८४ **कुलीरः,** फकारः पवर्गद्वितीयः ।

१८५ **कुलोद्भवा,** एकार एकादशस्वरः ।

१८६ **कुलम्,** एकार एकादशस्वरः । दन्त्यसकारः । हकारः। आकाशबीजमपि ।

१८७ **कुलान्तकनिवासिनी,** गकारः कवर्गतृतीयः । दकारस्तवर्गतृतीयः ।

१८८ **कुलान्तर्क्षम्,** ङकारः कवर्गपञ्चमः ।

१८९ **कुलान्तालयवासिनी,** ङकारः कवर्गपञ्चमः ।

१९० **कुल्ला.** ह्रस्व इकारस्तृतीयस्वरः । खकारः कवर्गद्वितीयः ।

१९१ **कुल्लुका,** (०) अनुस्वारः पञ्चदशस्वरः ।

१९२ **कुसुमायुधः,** तालव्यशकारः । क्लीमिति ककारलकारदीर्घेकारबिन्दुयोगेन ।

१९३ **कुसुमम्,** ककारो द्वितीयवर्गाद्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९४ **कुहूः,** दीर्घ ऊकारः षष्ठस्वरः। झकारश्चवर्गचतुर्थः।
१९५ **कूजिनी,** बकारः पवर्गतृतीयः।
१९६ **कूटपाणिः,** टकारश्चतुर्थवर्गादिमः।
१९७ **कूटः,** हकारो व्योमबीजम्।
१९८ **कूपः,** गकारः कवर्गतृतीयः।
१९९ **कूर्चम्,** हूमिति बीजं हकारदीर्घोकारबिन्दुरूपम्।
२०० **कूर्दिनी,** बकारः पवर्गतृतीयः।
२०१ **कूर्परः,** खकारः कवर्गद्वितीयः। छकारश्चवर्गद्वितीयः।
२०२ **कूर्मेश्वरः,** चकारस्तृतीयवर्गाद्यः।
२०३ **कूर्मः,** चकारस्तृतीयवर्गादिमः। फकारः पवर्गद्वितीयः।
२०४ **कूष्माण्डी** औकारश्चतुर्दशस्वरः।
२०५ **कृत्,** घकारः कवर्गचतुर्थः। जकारश्चवर्गतृतीयः।
२०६ **कृतान्तकृत्,** ठकारष्टवर्गद्वितीयः।
२०७ **कृतान्तकः,** (०) अनुस्वारः पञ्चदशस्वरः।
२०८ **कृतान्तः,** ञकारश्चवर्गान्तिमः।
२०९ **कृतिः,** (०) अनुस्वारः पञ्चदशस्वरः।
२१० **कृती,** दीर्घलृकारो दशमस्वरः।
२११ **कृपा,** दीर्घऋकारोऽष्टमस्वरः। ऐमिति बिन्दुसहितो द्वादशस्वरोपि
२१२ **कृशा,** ह्रीमिति हकाररकारचतुर्थस्वरबिन्दुयोगेन।
२१३ **कृशानुः,** णकारष्टवर्गपञ्चमः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२१४ **कृशाङ्गिनी,** ऐकारो द्वादशस्वरः ।

२१५ **कृषा,** एकार एकादशस्वरः ।

२१६ **कृष्णबीजम्,** क्लीमिति ककारलकारचतुर्थस्वरबिन्दुयोगेन ।

२१७ **कृष्णा,** क्रीमिति ककाररकारदीर्घेकारबिन्दुयोगेन ।

२१८ **कृष्णः,** थकारदकारौ तवर्गस्य द्वितीयतृतीयौ । रकारोऽन्तःस्थद्वितीयः ।

२१९ **केकराक्षी,** झकारश्चवर्गचतुर्थः ।

२२० **केतुः,** हुमिति हकारपञ्चमस्वरबिन्दुयोगेन । मूर्द्धन्यळकारः ।

२२१ **केदारपीठः,** (०)अनुस्वारः पञ्चदशस्वरः ।

२२२ **केदारः,** (०)अनुस्वारः पञ्चदशस्वरः ।

२२३ **केनः,** फकारः पवर्गद्वितीयः ।

२२४ **केलिनी,** (०)अनुस्वारः पञ्चदशस्वरः ।

२२५ **केलिवल्लभः,** औकारश्चतुर्दशस्वरः ।

२२६ **केवलः,** (०)अनुस्वारः पञ्चदशस्वरः ।

२२७ **केशरी,** ठकारष्टवर्गद्वितीयः ।

२२८ **केशवः,** ह्रस्वः अकारः प्रथमस्वरः । ह्रस्व उकारः पञ्चमस्वरः ।

२२९ **केशः,** दीर्घ ऊकारः षष्ठस्वरः । थकारस्तवर्गद्वितीयः । पकारः षष्ठवर्गप्रथमः ।

२३० **कैटभारिः,** खकारः कवर्गद्वितीयः ।

२३१ **कैरवी,** ककारो द्वितीयवर्गादिमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२३२ **कैलासेशः**, ओकारस्त्रयोदशस्वरः ।

२३३ **कैलासः**, ओकारस्त्रयोदशस्वरः ।

२३४ **कोकः**, दीर्घऋकारोऽष्टमस्वरः ।

२३५ **कोटरा**, ककारो द्वितीयवर्गाद्यः ।

२३६ **कोटराक्षी**. एकारैकारौ एकादशद्वादशस्वराविति ।

२३७ **कोटरी**, ह्रस्व इकारस्तृतीयस्वरः । णकारष्टवर्गपञ्चमः ।

२३८ **कोटरः**, ह्रस्वदीर्घौ इकारेकारौ तृतीयचतुर्थस्वरौ ।

२३९ **कोपनिवारणः**, हकारो व्योमबीजम् ।

२४० **कोपः**, क्षकारो वर्णान्तिमः ।

२४१ **कोमलः**, दीर्घऋकारोऽष्टमस्वरः ।

२४२ **कोलवक्त्रा**, ह्रस्व उकारः पञ्चमस्वरः ।

२४३ **कोलागिरिपीठनिवासिनी**, ह्रस्व उकारः पञ्चमस्वरः ।

२४४ **कोलागिरिः** ह्रस्व उकारः पञ्चमस्वरः ।

२४५ **कोशः**, मूर्द्धन्यषकारः ।

२४६ **कोष्ठपीशः**, ऐकारो द्वादशस्वरः ।

२४७ **कौमारी**, ह्रस्व उकारः पञ्चमस्वरः । ऐकारो द्वादशस्वरः । ओकारस्त्रयोदशस्वरः । घकारः कवर्गचतुर्थः । चकारजकारौ तृतीयवर्गप्रथमान्त्यौ । डकारष्टवर्गतृतीयः ।

२४८ **कौमुदी**, दीर्घआकारो द्वितीयस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४९ **कौलिनी,** **औ**कारानुस्वारौ चतुर्दशपञ्चदशस्वरौ । **क**कारो द्वितीयवर्गादिमः । **क्ष्म्रीं**मिति वर्णान्तिमक्षकारमकाररकार-दीर्घेकारबिन्दुयोगेनेति ।

२५० **कौशिकी,** दीर्घ **आ**कारो द्वितीयस्वरः ।

२५१ **कङ्कणम्,** **ग**कारः कवर्गतृतीयः । **झ**कारश्चवर्गचतुर्थः । **व**कारोऽन्तस्थचतुर्थः ।

२५२ **कण्ठकः,** **(:)** अः विसर्गरूपषोडशस्वरः ।

२५३ **कण्ठोष्ठम्,** **औ**कारश्चतुर्दशस्वरः । **ओ**कारस्त्रयोदशस्वरोऽपि ।

२५४ **कण्ठः,** **(:)** अः विसर्गरूपषोडशस्वरः ।

२५५ **कन्दर्पः,** **क्लीं**मिति ककारलकारदीर्घेकारबिन्दुयोगेन । ह्रस्व **इ**कारस्तृतीयस्वरः ।

२५६ **कन्दर्पास्त्रम्,** **ऐं**कारो बिन्दुसहितद्वादशस्वरः ।

२५७ **कन्दः,** **ल**कारोऽन्तस्थतृतीयः ।

२५८ **कम्,** **ज**कारश्चवर्गतृतीयः ।

२५९ **काम्पिनी,** **क्लृ**मिति द्वितीयवर्गादिमनवमस्वरबिन्दुयोगेन ।

२६० **काङ्क्षा,** **झ**कारश्चवर्गचतुर्थः ।

२६१ **कान्ता,** **(:)** विसर्गः षोडशस्वरः । **ग**कारः कवर्गतृतीयः । **स्त्रीं**मिति बीजम्-दन्त्यसकारतकाररकारदीर्घेकारबिन्दुरूपम् ।

२६२ **कान्तिगुह्या,** **ङ**कारः कवर्गपञ्चमः ।

२६३ **कान्तिदा,** **घ**कारस्तवर्गचतुर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२६४ **कान्तिमान्**, दीर्घ ईकारश्चतुर्थस्वरः ।
२६५ **कान्तः**, ह्रस्व इकारस्तृतीयस्वरः । ऐकारो द्वादशस्वरः । खकारगकारौ कवर्गद्वितीयतृतीयौ ।
२६६ **कान्तिः**, आकारो द्वितीयस्वरः । उकारः पञ्चमस्वरः । ह्रस्वदीर्घऌकारॡकारौ नवमदशमस्वरौ। ङकारः कवर्गान्तिमः । तालव्यशकारः । मूर्द्धन्यषकारः । हकारो व्योमबीजम् ।
२६७ **किङ्करीबीजम्**, ह्रस्वऋकारः सप्तमस्वरः । दीमिति तवर्गतृतीयदीर्घेकारबिन्दुसंयोगेन ।
२६८ **किङ्करः**, झकारश्चवर्गचतुर्थः ।
२६९ **किङ्किणी**, ह्रस्वऋकारः सप्तमस्वरः । घकारः कवर्गचतुर्थः ।
२७० **किञ्जल्कः**, झकारश्चवर्गचतुर्थः ।
२७१ **किन्नरी**, जकारश्चवर्गतृतीयः ।
२७२ **किन्नरः**, **नमः** हृदयबीजम् ।
२७३ **कुञ्जरः**, **पा**मिति षष्ठवर्गादिमदीर्घाकारबिन्दुसहितम् ।
२७४ **कुब्जा**, **फ**कारः पवर्गद्वितीयः ।
२७५ **कुण्डली**, **ग**कारः कवर्गतृतीयः । दन्त्य**स**कारः । ह्रीमिति मायाबीजम् ।
२७६ **कुण्डलम्**, (:) विसर्गः षोडशस्वरः । ठकारष्टवर्गद्वितीयः । दन्त्य**स**कारः ।
२७७ **कुण्डिका**, **क**कारो द्वितीयवर्गादिमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu .

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२७८ कुण्डोदरी, दीर्घलृकारोदशमस्वरः ।

२७९ कुन्ती, क्रीमिति ककाररकारदीर्घेकारबिन्दुयोगेन ।

२८० कुम्भः, दीर्घलृकारो दशमस्वरः । पकारः षष्ठवर्गादिमः ।

२८१ कः, एकार एकादशस्वरः ।

२८२ कुः, ठकारष्टवर्गद्वितीयः । अन्तस्थलकारोऽपि ।

२८३ क्रिया, ह्स्वऋकारःसप्तमस्वरः । लकारोऽन्तस्थतृतीयः ।

२८४ क्रुद्धः, भकारः पवर्गचतुर्थः ।

२८५ क्रूरतरः, (०) अनुस्वारः पञ्चदशस्वरः ।

२८६ क्रूरेशः, (०) अनुस्वारः पञ्चदशस्वरः ।

२८७ क्रोडपुच्छः, ढकारष्टवर्गचतुर्थः । तकारः पञ्चमवर्गादिमः ।

२८८ क्रोधनायकः, ककारो द्वितीयवर्गाद्यः ।

२८९ क्रोधनः, दीर्घ ऊकारः षष्ठस्वरः । ककारो द्वितीयवर्गादिमः ।

२९० क्रोधिनी, रकारोऽन्तस्थद्वितीयः ।

२९१ क्रोधीशः, ककारो द्वितीयवर्गादिमः ।

२९२ क्रोधः, ह्स्वऋकारःसप्तमस्वरः । (ः) विसर्गः षोडशस्वरः । क्षकारो वर्णान्तिमः । हूंकारो हकारषष्ठस्वरबिन्दुयोगः । क्रूंकारः ककाररकारषष्ठस्वरबिन्दुयोगः ।

२९३ क्लिन्ना, ह्स्व उकारः पञ्चमस्वरः । भकारः पवर्गचतुर्थः ।

२९४ क्लीबवक्त्रः, ङकारः कवर्गपञ्चमः ।

२९५ क्लेदनम्, क्लीमिति ककारलकारचतुर्थस्वरबिन्दुयोगेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२९६ **क्लेदिनी**, बकारः पवर्गतृतीयः । ऌकारो नवमस्वरः ।
२९७ **क्लेशितः**, मकारः पवर्गपञ्चमः ।
२९८ **क्वाणः**, झ्रौमिति बीजं चवर्गचतुर्थान्तस्थद्वितीयचतुर्दशस्वर-
बिन्दुयोगेनेति ।

इति ककारः ।

२९९ **खगा**, टकारश्चतुर्थवर्गादिमः ।
३०० **खगः**, खकारः कवर्गद्वितीयः ।
३०१ **खड्गकः**, खकारः कवर्गद्वितीयः ।
३०२ **खड्गबीजम्**, खमिति कवर्गद्वितीयबिन्दुयोगेन ।
३०३ **खड्गिनी**, खकारः कवर्गद्वितीयः ।
३०४ **खड्गी**, वकारोऽन्तस्थचतुर्थः । घकारः कवर्गचतुर्थः ।
३०५ **खड्गीशः**, वकारघकारावन्तस्थकवर्गचतुर्थौ ।
३०६ **खद्योतः**, ह्रमिति हकाररेफबिन्दुयोगेन ।
३०७ **खनदा**, टकारश्चतुर्थवर्गादिमः ।
३०८ **खप्रबन्धकः**, (ं)अनुस्वारः पञ्चदशस्वरः ।
३०९ **खरः**, षकारो मूर्द्धन्यः ।
३१० **खर्वः**, ङकारः कवर्गपञ्चमः ।
३११ **खलः** तालव्यशकारः ।
३१२ **खेचरी**, ह्रस्वः अकारः प्रथमस्वरः । ह्रस्वदीर्घौकारौ पञ्चमषष्ठ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वरौ । दीर्घऋकारोऽष्टमस्वरः । चकारस्तृतीयवर्गादिमः । टकारठकारौ चतुर्थवर्गप्रथमद्वितीयौ ।

३१३ खेचरीबीजम्, ह्स्ख्फ्रें हकारदन्त्यसकारखकारफकाररेफैणैकादशस्वरेण बिन्दुना च युक्तम् ।

३१४ खेचरः, टकारश्चतुर्थवर्गप्रथमः ।

३१५ खेरकः, मूर्द्धन्यषकारः ।

३१६ खञ्जनः, झकारश्चवर्गचतुर्थः ।

३१७ खण्डनम्, ळकारो मूर्द्धन्यः ।

३१८ खम्, दीर्घ आकारो द्वितीयस्वरः । दीर्घलृकारो दशमस्वरः । आमिति दीर्घाकारबिन्दुयोगेन, पाशबीजम् । हकारोऽपि ।

३१९ ख्यातबीजम्, ख्र्यूं खकारान्तस्थयकाररेफदीर्घोकारबिन्दुसहितम् ।

इति खकारः ।

३२० गगनरत्नम्, ग्लूमिति बीजं गकारलकारषष्ठस्वरबिन्दुयोगेनेति

३२१ गगनाम्बरधारिणी, णकारष्टवर्गपञ्चमः ।

३२२ गगनम्, (०)अनुस्वारः पञ्चदशस्वरः । ह्रस्व उकारः पञ्चमस्वरः । हकारः ऊष्मान्तिमः । खकारः कवर्गद्वितीयः । भकारः पवर्गचतुर्थः ।

३२३ गजकुम्भः, गकारः कवर्गतृतीयः ।

३२४ गजगामिनी, दीर्घऋकारोऽष्टमस्वरः ।

३२५ गजवक्त्रकः, एकार एकादशस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३२६ **गजसाधनम्**, क्रोमिति ककाररेफत्रयोदशस्वरबिन्दुसहितम् ।
३२७ **गजाननः**, दीर्घलृकारो दशमस्वरः ।
३२८ **गजाङ्कुशः**, ह्रस्व उकारः पञ्चमस्वरः । टकारश्चतुर्थवर्गादिमः ।
३२९ **गजेश्वरी**, झकारश्चवर्गचतुर्थः ।
३३० **गजेन्द्रः**, ककारखकारौ द्वितीयवर्गादिमद्वितीयौ ।
३३१ **गजः**, दीर्घ आकारो द्वितीयस्वरः। प्रामिति षष्ठवर्गादिमरेफद्वितीयस्वरबिन्दुयोगेन ।
३३२ **गडवः**, दीर्घलृकारो दशमस्वरः ।
३३३ **गणनाथः**, (:) विसर्गः षोडशस्वरः । ककारो द्वितीयवर्गादिमः ।
३३४ **गणनायकः**, दीर्घऋकारोऽष्टमस्वरः ।
३३५ **गणपतिबीजम्**, गमिति कवर्गतृतीयबिन्दुसहितम् ।
३३६ **गणपालकः**, ळकारो मूर्द्धन्यः ।
३३७ **गणराट्**, खकारः कवर्गद्वितीयः ।
३३८ **गणाधिपः** दीर्घलृकारो दशमस्वरः । ढकारष्टवर्गचतुर्थः ।
३३९ **गणाध्यक्षः**, गकारः कवर्गतृतीयः ।
३४० **गणाम्बा**, एकार एकादशस्वरः ।
३४१ **गणिकाबीजम्**, खीमिति कवर्गद्वितीयरेफचतुर्थस्वरबिन्दुसहितम् ।
३४२ **गणेशः**, गकारः कवर्गतृतीयः ।
३४३ **गणेश्वरी**, ऐकारो द्वादशस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३४४ **गणेश्वरः**, गकारः कवर्गतृतीयः । क्षकारो वर्णान्तिमः ।
३४५ **गतः**, चकारस्तृतीयवर्गादिमः । मूर्द्धन्यळकारः ।
३४६ **गतिः**, जकारश्चवर्गतृतीयः । रकारोऽन्तस्थद्वितीयः ।
३४७ **गदिनी**, ङकारः कवर्गपञ्चमः ।
३४८ **गदि**, खकारः कवर्गद्वितीयः ।
३४९ **गदीशः**, खकारः कवर्गद्वितीयः ।
३५० **गरुडः**, खकारः कवर्गद्वितीयः । क्षिमिति बीजं वर्णान्तिम-ह्रस्वेकारबिन्दुयोगेन ।
३५१ **गर्गः**, झकारश्चवर्गचतुर्थः ।
३५२ **गर्जितम्**, टकारश्चतुर्थवर्गप्रथमः ।
३५३ **गर्जिनी**, ह्रस्व इकारस्तृतीयस्वरः । पकारः षष्ठवर्गप्रथमः ।
३५४ **गर्भशक्तिः**, (ः)विसर्गः षोडशस्वरः ।
३५५ **गलत्**, चकारस्तृतीयवर्गाद्यः ।
३५६ **गलः**, दन्त्यसकारः ।
३५७ **गर्वविमोचनः**, मूर्द्धन्यषकारः ।
३५८ **गाथा**, गकारः कवर्गतृतीयः । लकारः अन्तस्थतृतीयः ।
३५९ **गाथागन्धर्वगः**, गकारः कवर्गतृतीयः ।
३६० **गायकः**, रकारोऽन्तस्थद्वितीयः ।
३६१ **गायत्री**, ॐ इति प्रणवः ओकारस्त्रयोदशस्वरः । गकारः कव-र्गतृतीयः । झकारश्चवर्गचतुर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३६२ **गायनः**, ञकारश्चवर्गपञ्चमः । लकारोऽन्तस्थतृतीयः ।

३६३ **गारुडी**, ह्रस्वऋकारः सप्तमस्वरः ।

३६४ **गिरिजा**, वकारोऽन्तस्थचतुर्थः ।

३६५ **गिरिजः**, ञकारश्चवर्गपञ्चमः ।

३६६ **गिरिदर्शनः**, गकारः कवर्गतृतीयः ।

३६७ **गिरिनायकः**, नकारस्तवर्गपञ्चमः ।

३६८ **गिरिः**, उकारः पञ्चमस्वरः । टकारश्चतुर्थवर्गीयः । वकारोऽन्तस्थचतुर्थः ।

३६९ **गिरीश्वरी**, रकारोऽन्तस्थद्वितीयः वह्निबीजम् ।

३७० **गिरीश्वरः**, लकारोऽन्तस्थतृतीयः ।

३७१ **गीतम्**, गकारः कवर्गतृतीयः ।

३७२ **गीर्वाणः**, क्षकारोऽन्तिमवर्णः ।

३७३ **गुणबीजकः**, ओमिति प्रणवः ।

३७४ **गुणभूतेज्यः**, ओमिति प्रणवः ।

३७५ **गुणाढ्या**, ओमिति प्रणवः ।

३७६ **गुरुबीजम्**, ह् स् क्ष् म् ल् व् र् य् ऊमिति व्यञ्जनहकारदन्त्यसकारान्तिमक्षकारमकारलकारवकाररकारान्तस्थयकारषष्ठस्वरबिन्दुयोगेन ।

३७७ **गुरुशक्तिबीजम्**, पूर्वगुरुबीजमेव हसयोर्वैपरीत्येन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३७८ **गुरुः**, दीर्घआकारो द्वितीयस्वरः। खकारगकारौ कवर्गद्वितीयतृ
तीयौ । ढकारष्टवर्गचतुर्थः ।

३७९ **गुल्फा**, दकारस्तवर्गतृतीयः ।

३८० **गुह्या**, ह्रीमिति मायाबीजं हकाररकारचतुर्थस्वरबिन्दुयोगेन ।

३८१ **गुहाकृतिः**, दीर्घऌकारो दशमस्वरः ।

३८२ **गुहः**, झकारश्चवर्गचतुर्थः ।

३८३ **गुह्यकर्णः**, पकारः षष्ठवर्गप्रथमः ।

३८४ **गुह्यकर्त्ता**, पकारः षष्ठवर्गप्रथमः ।

३८५ **गुह्यनिद्रा**, दीर्घ ऊकारः षष्ठः स्वरः ।

३८६ **गुह्यवार्त्ता**, पकारः षष्ठवर्गादिमः ।

३८७ **गुह्यः**, थकारस्तवर्गद्वितीयः ।

३८८ **गृध्ररवः**, ह्रस्वऌकारो नवमस्वरः ।

३८९ **गृध्रः**, ह्रस्वऌकारो नवमस्वरः ।

३९० **गोकर्णेशः**, छकारश्चवर्गद्वितीयः ।

३९१ **गोकर्णः**, छकारश्चवर्गद्वितीयः ।

३९२ **गोकुलेश्वरः**, गकारः कवर्गतृतीयः ।

३९३ **गोचरः**, गकारः कवर्गतृतीयः ।

३९४ **गोणी**, गकारः कवर्गतृतीयः ।

३९५ **गोत्रभित्**, लकारोऽन्तस्थतृतीयः ।

३९६ **गोत्रा** थकारस्तवर्गद्वितीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३९७ **गोधनः**, छकारश्चवर्गद्वितीयः ।
३९८ **गोधरा**, गकारः कवर्गतृतीयः ।
३९९ **गोभूः**, गकारः कवर्गतृतीयः ।
४०० **गोमुखी**, दीर्घऋकारोऽष्टमस्वरः ।
४०१ **गोमुखम्**, गकारः कवर्गतृतीयः ।
४०२ **गोविन्दः**, दीर्घ ईकारश्चतुर्थस्वरः ।
४०३ **गौतमः**, घकारः कवर्गचतुर्थः ।
४०४ **गोबीजम्**, गकारः कवर्गतृतीयः ।
४०५ **गौरवम्**, लृकारो नवमस्वरः ।
४०६ **गौरी**, गकारघकारौ कवर्गतृतीयचतुर्थौ ।
४०७ **गौरः**, घकारः कवर्गचतुर्थः ।
४०८ **गङ्गा**, गकारः कवर्गतृतीयः ।
४०९ **गङ्गाबीजम्**, दीर्घलृकारो दशमस्वरः ।
४१० **गण्डनामा**, ह्रस्वलृकारो नवमस्वरः ।
४११ **गण्डः**, दीर्घलृकारो दशमस्वरः ।
४१२ **गन्धर्वः**, ह्रस्व इकारस्तृतीयस्वरः ।
४१३ **गन्धाकर्षिणी**, दीर्घऋकारोष्टमस्वरः ।
४१४ **गन्धः**, टकारश्चतुर्थवर्गादिमः । तकारः पञ्चमवर्गादिमः । शकारस्तालव्यः ।
४१५ **गीः**, गकारः कवर्गतृतीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४१६ गौः, गकारः कवर्गतृतीयः । ञकारश्चवर्गपञ्चमः । दन्त्यसकारः।
४१७ ग्रासिनी, ककारः द्वितीयवर्गादिमः ।
४१८ ग्रहाधीशः, झकारश्चवर्गचतुर्थः ।
४१९ ग्रहः, थकारस्तवर्गद्वितीयः ।
४२० ग्रामणी, पकारबकारौ षष्ठवर्गादिमतृतीयौ ।
४२१ ग्रासिनी, ह्रमिति हकाररेफप्रथमस्वरबिन्दुयोगेन ।
४२२ ग्रासः, क्षकारोऽन्त्यवर्णः ।
४२३ ग्राहकः, थकारस्तवर्गद्वितीयः । ळौः मूर्द्धन्यळकारः ।
४२४ ग्राहः, थकारस्तवर्गद्वितीयः ।
४२५ ग्रन्थिः, थकारस्तवर्गद्वितीयः ।

इति गकारः ।

४२६ घटाटिः, ञकारश्चवर्गपञ्चमः ।
४२७ घटिकात्मिका, छकारश्चवर्गद्वितीयः ।
४२८ घटोदरः, गकारः कवर्गतृतीयः ।
४२९ घनगर्जिनी, झकारश्चवर्गचतुर्थः ।
४३० घनहारः, घकारः कवर्गचतुर्थः ।
४३१ घना, एकार एकादशस्वरः ।
४३२ घनः, घकारः कवर्गचतुर्थः । वकारोऽन्तस्थचतुर्थः । भमिति पवर्गचतुर्थपञ्चदशस्वरयोगेन ।
४३३ घर्घरध्वनिः, ञकारश्चवर्गपञ्चमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४३४ **घर्मटी**, ह्रस्व इकारस्तृतीयस्वरः ।
४३५ **घस्मरा**, घकारः कवर्गचतुर्थः ।
४३६ **घुरा**, झकारश्चवर्गचतुर्थः ।
४३७ **घुर्घुरः**, घकारः कवर्गचतुर्थः ।
४३८ **घूर्णकः**, ठकारष्टवर्गद्वितीयः ।
४३९ **घृणा**, ऐकारो द्वादशस्वरः ।
४४० **घोणा**, प्रामिति षष्ठवर्गादिमरेफद्वितीयस्वरबिन्दुयोगेन ।
४४१ **घोरतरः**, दीर्घॠकारोऽष्टमस्वरः ।
४४२ **घोरदंष्ट्रः**, घकारः कवर्गचतुर्थः ।
४४३ **घोरनायकः**, घकारः कवर्गचतुर्थः ।
४४४ **घोरनिस्वना**, घ्रींमिति कवर्गचतुर्थदीर्घेकारबिन्दुयोगेन ।
४४५ **घोररूपा**, ह्रस्व उकारः पञ्चमस्वरः । खकारः कवर्गद्वितीयः ।
४४६ **घोरा**, दीर्घॠकारः षष्ठस्वरः । (ः) विसर्गः षोडशस्वरः ।
क्षकारगकारौ द्वितीयवर्गादिमतृतीयौ । दन्त्यसकारः ।
४४७ **घोरः**, घकारः कवर्गचतुर्थः ।
४४८ **घोषा**, चकारस्तृतीयवर्गादिमः
४४९ **घण्टाटः**, घकारः कवर्गचतुर्थः ।
४५० **घण्टाधारिणी**, घकारः कवर्गचतुर्थः ।
४५१ **घण्टाबीजम्**, घ्रींमिति कवर्गचतुर्थरेफदीर्घेकारबिन्दुयोगेन ।
४५२ **घण्टि**, घकारः कवर्गचतुर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४५३ घण्टिका, ह्रस्वऋकारस्सप्तमस्वरः । (०) अनुस्वारः पञ्च-
दशस्वरः । घकारः कवर्गचतुर्थः ।

४५४ घाण्टिकः, (:) विसर्गः षोडशस्वरः ।

४५५ घण्टीः, भकारः पवर्गचतुर्थः ।

४५६ घण्टेशः, घकारः कवर्गचतुर्थः ।

४५७ घ्राणी, ढकारश्चतुर्थवर्गादिमः ।

इति घकारः ।

४५८ ङराट्, ङकारः कवर्गपञ्चमः ।

४५९ ङेनामा, यकारोऽन्तस्थादिमः ।

इति ङकारः ।

इति श्रीवर्णबीजप्रकाशे कवर्गप्रकाशो द्वितीयः समाप्तः ॥ २ ॥

अथ चवर्गप्रकाशः ३.

१ चक्रवालुकः, खकारः कवर्गद्वितीयः ।

२ चक्रिणी, चकारस्तृतीयवर्गादिमः ।

३ चक्रिबीजम्, दकारस्तवर्गतृतीयः ।

४ चक्री, ककारो द्वितीयवर्गादिमः ।

५ चक्रम्, लकारोऽन्तस्थतृतीयः ।

६ चक्षुषः, (०) अनुस्वारः पञ्चदशस्वरः ।

७ चक्षुः, वौषट् नेत्रबीजम् ।

८ चतुरानना, जकारश्चवर्गतृतीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९ चतुराननः, ककारो द्वितीयवर्गादिमः ।
१० चतुर्दशी, औकारश्चतुर्दशस्वरः ।
११ चतुर्मात्रः, ॐ इति प्रणवः ।
१२ चतुर्मूर्तिः, छकारश्चवर्गद्वितीयः ।
१३ चतुष्कलः, हूमिति हकारषष्ठस्वरबिन्दुयोगेन ।
१४ चतुष्पादः ओमिति प्रणवः ।
१५ चतुस्तनुः, छकारश्चवर्गद्वितीयः ।
१६ चतुस्तारा, ञकारश्चवर्गपञ्चमः ।
१७ चत्वरा, ऐकारो द्वादशस्वरः ।
१८ चपला, डकारश्चतुर्थवर्गतृतीयः ।
१९ चरणः, ळकारो मूर्द्धन्यः ।
२० चरमा, णकारष्टवर्गपञ्चमः । पकारः षष्ठवर्गादिमः ।
२१ चरित्रा, चकारस्तृतीयवर्गादिमः ।
२२ चरित्रेशी, दकारस्तवर्गतृतीयः ।
२३ चरः, एकारः एकादशस्वरः ।
२४ चरुः, घकारस्तवर्गचतुर्थः ।
२५ चर्म, एकारैकारावेकादशद्वादशस्वरौ । चकारस्तृतीयवर्गादिमः ।
दकारस्तवर्गतृतीयः ।
२६ चर्मार्णम्, ऐकारो द्वादशस्वरः । स एव बिन्दुसहितो वाग्भवबीजम् ।
२७ चलनः, चकारस्तृतीयवर्गादिमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२८ **चलापकः**, डकारष्टवर्गतृतीयः ।
२९ **चलः**, चकारस्तृतीयवर्गादिमः ।
३० **चवर्गगः**, झकारश्चवर्गचतुर्थः ।
३१ **चापबीजम्**, धमिति तवर्गचतुर्थबिन्दुयोगेन ।
३२ **चापिनी**, टकारश्चतुर्थवर्गप्रथमः ।
३३ **चापः**, ककारो द्वितीयवर्गप्रथमः ।
३४ **चामी**, थकारस्तवर्गद्वितीयः ।
३५ **चामुण्डा**, अकारः प्रथमस्वरः । एकार एकादशस्वरः । औकारश्चतुर्दशस्वरः । (०) अनुस्वारः पञ्चदशस्वरः । (:) विसर्गः षोडशस्वरः । गकारः कवर्गतृतीयः । चकारछकारौ तृतीयवर्गस्य प्रथमद्वितीयौ । यकारोऽन्तस्थादिमः ।
३६ **चामुण्डाबीजम्**, च्रींमिति चकाररकारचतुर्थस्वरबिन्दुयोगेन ।
३७ **चारणः**, ऐकारो द्वादशस्वरः । अयमेव बिन्दुसहितो वाग्भवमपि ।
३८ **चारी**, छकारश्चवर्गद्वितीयः ।
३९ **चारु**, दकारस्तवर्गतृतीयः । छ्रींमिति छकाररेफचतुर्थस्वरबिन्दुयोगेन ।
४० **चारुकम्**, छ्रूंबीजम्—चवर्गद्वितीयान्तस्थद्वितीयचतुर्थस्वरबिन्दुयोगेन ।
४१ **चारुहासिनी**, ञकारश्चवर्गपञ्चमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४२ चार्वङ्गी, ऐकारो द्वादशस्वरः। बिन्दुना सहितो वाग्भवमव्ययमेव।छ्रींमिति बीजम्–छकाररकारदीर्घेकारबिन्दुयोगेन।
४३ चालकः, ह्रस्व इकारस्तृतीयस्वरः। चकारस्तृतीयवर्गादिमः।
४४ चालुबाधा, तकारः पञ्चमवर्गादिमः।
४५ चिच्छक्तिः, ओकारस्त्रयोदशस्वरः।
४६ चित्तजन्मा, ककारो द्वितीयवर्गादिमः। क्लींमिति बीजम्–ककारलकारचतुर्थस्वरविन्दुयोगेन।
४७ चित्ततर्जः, ऋकारः सप्तमस्वरः।
४८ चित्तवासिनी, टकारश्चतुर्थवर्गादिमः।
४९ चित्तविद्राविणी, ऐकारो द्वादशस्वरः।
५० चित्ताकर्षिणी, ह्रस्वलृकारो नवमस्वरः।
५१ चित्तेन्द्राणी, ऐकारो द्वादशस्वरः।
५२ चित्रधारी, चकारस्तृतीयवर्गादिमः।
५३ चित्रवसना, अकारः प्रथमस्वरः।
५४ चित्रा, टकारश्चतुर्थवर्गादिमः।
५५ चित्रिणी, ह्रस्व इकारस्तृतीयस्वरः।
५६ चूडा, वषट्।
५७ चेटिका, ह्रस्व उकारः पञ्चमस्वरः।
५८ चेतनः, चकारस्तृतीयवर्गादिमः।
५९ चेष्टा, यकारोऽन्तस्थादिमः।
६० चैतन्यम्, हकारो व्योमबीजम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६१ **चैलम्**, **ह्सौ**मिति व्यञ्जनहकारदन्त्यसकारचतुर्दशस्वरबिन्दुयोगेन।
६२ **चौरकः**, **त**कारः पञ्चमवर्गादिमः ।
६३ **चञ्चला**, **ध**कारस्तवर्गचतुर्थः ।
६४ **चञ्चलाक्षी**, रकारोऽन्तस्थद्वितीयः ।
६५ **चञ्चलः**, **च**कारझकारौ तृतीयवर्गादिमचतुर्थौ ।
६६ **चञ्चुः**, (०)अनुस्वारः पञ्चदशस्वरः।
६७ **चण्डवल्लभः**, ह्रस्व **उ**कारः पञ्चमस्वरः ।
६८ **चण्डभैरवः**, **औ**कारश्चतुर्दशस्वरः ।
६९ **चण्डमुण्डधरः**, **च**कारस्तृतीयवर्गादिमः ।
७० **चण्डलः**, **द**कारस्तवर्गतृतीयः ।
७१ **चण्डवारुणः**, **च**कारस्तृतीयवर्गादिमः ।
७२ **चण्डविक्रमः**, **च**कारस्तृतीयवर्गादिमः ।
७३ **चण्डा**, ह्रस्व **इ**कारस्तृतीयस्वरः। **ग**कार**ङ**कारौ कवर्गतृतीयपञ्चमौ।
७४ **चण्डिका**, दीर्घ **आ**कारो द्वितीयस्वरः । **औ**कारश्चतुर्दशस्वरः ।
(**:**) विसर्गः षोडशस्वरः । **ठंठ**मिति ठकारयुगलं पञ्चदशस्वरसहितमिति ।
७५ **चण्डिकेश्वरः**, **ऐ**कारो द्वादशस्वरो बिन्दुसहितोऽपि ।
७६ **चण्डी**, (**:**)विसर्गः षोडशस्वरः । **च**कारस्तृतीयवर्गादिमः ।
फकारः षष्ठवर्गद्वितीयः । **वषट्** शिखाबीजम् ।
७७ **चण्डीशः**, **ख**कारः कवर्गद्वितीयः । तालव्य**श**कारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७८ **चण्डोग्रा,** दीर्घ ईकारश्चतुर्थस्वरः ।

७९ **चण्डः,** ह्रस्वदीर्घोकारौ पञ्चमषष्ठस्वरौ **औ**कारश्चतुर्दशस्वरः । **ख**कारः कवर्गद्वितीयः । ञकारश्चवर्गपञ्चमः ।

८० **चन्दनः,** **घ**कारः कवर्गचतुर्थः **च**कारस्तृतीयवर्गादिमः । छकारश्चवर्गद्वितीयः ।

८१ **चन्दिनी,** **न**कारस्तवर्गपञ्चमः ।

८२ **चन्द्रघण्टिका,** (०) अनुस्वारः पञ्चदशस्वरः ।

८३ **चन्द्रपुरपीठः,** (ः) विसर्गः षोडशस्वरः ।

८४ **चन्द्रपुरी,** (ः) विसर्गः षोडशस्वरः ।

८५ **चन्द्रबीजम्,** **स्वौ**मिति **स्व**मपि-कुत्रचित् दन्त्यसकारान्तस्थवकारचतुर्दशस्वरबिन्दुना पूर्वमपरं दन्त्यसकारवकारह्रस्वाकारबिन्दुयोगेन ।

८६ **चन्द्रमण्डलम्,** **ठ**कारष्टवर्गद्वितीयः ।

८७ **चन्द्रमाः,** (०)अनुस्वारः पञ्चदशस्वरः । ङकारः कवर्गपञ्चमः । **च**कारस्तृतीयवर्गादिमः । **द्रा**मिति तवर्गतृतीयरकारद्वितीयस्वरबिन्दुयोगेन ।

८८ **चन्द्ररुक्,** **त**कारः पञ्चमवर्गादिमः ।

८९ **चन्द्ररूपः,** **च**कारस्तृतीयवर्गादिमः ।

९० **चन्द्रवसनम्,** **ऐ**कारो द्वादशस्वरः ।

९१ **चन्द्रवेगः,** **च**कारस्तृतीयवर्गादिमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९२ **चन्द्राद्याघः**, ककारो द्वितीयवर्गादिमः ।

९३ **चन्द्रिका**, ह्रस्वऌकारो नवमस्वरः । थकारः पवर्गचतुर्थः ।

९४ **चन्द्रः**, ह्रस्वदीर्घेकारौ तृतीयचतुर्थस्वरौ । ऐकारो द्वादशस्वरः । (०)अनुस्वारः पञ्चदशस्वरः । चकारछकारौ तृतीयवर्गादिमद्वितीयौ । लकारोऽन्तस्थतृतीयः । दन्त्यसकारः ऐङ्कारे बिन्दुसहितद्वादशस्वरः स एव वाग्भवसञ्ज्ञकः । द्रामिति तवर्गतृतीयरकारद्वितीयस्वरबिन्दुयोगेन । ग्लौमिति गकार लकारचतुर्दशस्वरबिन्दुयोगेन ।

९५ **चान्द्री**, छकारश्चवर्गद्वितीयः ।

९६ **चिन्ता**, धकारस्तवर्गचतुर्थः ।

९७ **चिन्तामणिबीजम्**, र्क्ष्म्र्य्आमिति रकारान्त्यक्षकारमकार रकारान्तस्थयकारद्वितीयस्वरबिन्दुयोगेन ।

इति चकारः ।

९८ **छटाटोपः**, छकारश्चवर्गद्वितीयः ।

९९ **छत्रम्**, छकारश्चवर्गद्वितीयः ।

१०० **छर्दिनी**, फकारः पवर्गद्वितीयः ।

१०१ **छविः**, हकारो व्योमबीजम् ।

१०२ **छागलण्डः**, वकारोऽन्तस्थचतुर्थः ।

१०३ **छाया**, ओकारस्त्रयोदशस्वरः । छकारश्चवर्गद्वितीयः ।

१०४ **छायाच्छत्रम्**, क्षकारोऽन्तिमवर्णः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०५ **छिदा,** भकारः पवर्गचतुर्थः ।
१०६ **छेदनम्,** दकारस्तवर्गतृतीयः ।
१०७ **छिन्नमस्ता,** त्रींमिति तकाररकारचतुर्थस्वरबिन्दुयोगेन ।
१०८ **छिन्ना,** णकारष्टवर्गपञ्चमः ।

इति छकारः ।

१०९ **जगत्,** नकारस्तवर्गपञ्चमः । **नमः** हृदयबीजमपि ।
११० **जगती,** जकारश्चवर्गतृतीयः ।
१११ **जगत्कर्ता,** ह्रीमिति हकाररेफचतुर्थस्वरबिन्दुयोगेन मायाबीजमिति।
११२ **जगद्धात्री,** दीर्घॠकारोऽष्टमस्वरः । औकारश्चतुर्दशस्वरः ।
ठकारष्टवर्गद्वितीयः । दकारस्तवर्गतृतीयः ।
११३ **जगद्बीजम्,** ह्रस्वऌकारो नवमस्वरः । दन्त्यसकारः ।
११४ **जगद्धावी,** वकारोऽन्तस्थचतुर्थः ।
११५ **जगद्योनिः,** ऐकारो द्वादशस्वरः ।
११६ **जगद्रावी,** वकारोऽन्तस्थचतुर्थः ।
११७ **जगन्मयी,** ह्रस्वऌकारो नवमस्वरः ।
११८ **जगन्माता,** ओकारस्त्रयोदशस्वरः । ञकारश्चवर्गपञ्चमः ।
११९ **जटा,** ऐकारो द्वादशस्वरः ।
१२० **जटालः,** जकारश्चवर्गतृतीयः ।
१२१ **जटिनी,** ठकारष्टवर्गद्वितीयः ।
१२२ **जटिलः,** तकारः पञ्चमवर्गादिमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२३ **जटी**, तकारः पञ्चमवर्गादिमः। यकारोऽन्तस्थादिमः।

१२४ **जटेशः**, ञकारश्चवर्गपञ्चमः।

१२५ **जठरसंस्थितः**, मकारः पवर्गपञ्चमः।

१२६ **जठरम्**, मकारः पवर्गपञ्चमः। मूर्द्धन्यषकारः।

१२७ **जनाधिपः**, ढकारष्टवर्गचतुर्थः।

१२८ **जनार्दनः**, फकारः पवर्गद्वितीयः।

१२९ **जनेश्वरः**, उकारः पञ्चमस्वरः।

१३० **जनः**, (०)अनुस्वारः पञ्चदशस्वरः।

१३१ **जपजः**, जकारश्चवर्गतृतीयः।

१३२ **जपादिः**, फकारः पवर्गद्वितीयः।

१३३ **जयत्रः**, जकारश्चवर्गतृतीयः।

१३४ **जयदा**, ञकारश्चवर्गपञ्चमः।

१३५ **जयप्रदा**, दीर्घ आकारो द्वितीयस्वरः।

१३६ **जयश्रीः**, औकारश्चतुर्दशस्वरः। श्रोमिति तालव्यशकाररकारत्रयोदशस्वरबिन्दुयोगेन।

१३७ **जया**, दीर्घ ऊकारः षष्ठस्वरः। ह्रस्वऌकारो नवमस्वरः। ककारो द्वितीयवर्गादिमः। जकारश्चवर्गतृतीयः। झकारश्चवर्गचतुर्थः। यकारोऽन्तस्थादिमः।

१३८ **जयाननः**, ककारो द्वितीयवर्गादिमः।

१३९ **जयावहा**, जकारश्चवर्गतृतीयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१४० **जयावहः,** **भ**कारः पवर्गचतुर्थः ।

१४१ **जयिनी,** **ग**कारः कवर्गतृतीयः । **ठ**कारष्टवर्गद्वितीयः । **प**कारः षष्ठवर्गादिमः। ह्स्ल्व्यूमिति हकारदन्त्यसकारान्तस्थलकारान्तस्थवकारान्तस्थयकारषष्ठस्वरबिन्दुयोगेन ।

१४२ **जयन्ती,** **ज**कारश्चवर्गतृतीयः । **त**कारः पञ्चमवर्गादिमः ।

१४३ **जयन्तीपुरम्,** **त**कारः पञ्चमवर्गादिमः ।

१४४ **जयन्तः,** **ज**कारश्चवर्गतृतीयः ।

१४५ **जयः,** **ज**कारश्चवर्गतृतीयः । **म**कारः पवर्गपञ्चमः ।

१४६ **जरा,** **ट**कारश्चतुर्थवर्गादिमः ।

१४७ **जराट्,** **ओ**कारस्त्रयोदशस्वरः ।

१४८ **जरायुरूपिणी** (**:**)विसर्गः षोडशस्वरः ।

१४९ **जराहरा,** **ट**कारश्चतुर्थवर्गादिमः ।

१५० **जलस्थितिः,** **झ**कारश्चवर्गचतुर्थः ।

१५१ **जलात्मा,** **ख**कारः कवर्गद्वितीयः ।

१५२ **जलेश्वरः,** **म**कारः पवर्गपञ्चमः ।

१५३ **जलम्,** **ऋ**कारः सप्तमस्वरः । **क**कारो द्वितीयवर्गादिमः । **ठ**कारष्टवर्गद्वितीयः । **व**कारोऽन्तस्थचतुर्थः । दन्त्य**स**कारः ।

१५४ **जवनः,** **ज**कारश्चवर्गतृतीयः ।

१५५ **जागरलः,** **ऌ**कारो नवमस्वरः ।

१५६ **जाठराग्निः,** मूर्द्धन्य**ष**कारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१५७ **जाठरः**, ळकारमूर्द्धन्यः ।
१५८ **जातकः**, तकारः पञ्चमवर्गादिमः ।
१५९ **जातिः**, जकारश्चवर्गतृतीयः ।
१६० **जानुशक्तिः**, एकार एकादशस्वरः ।
१६१ **जानः**, एकार एकादशस्वरः ।
१६२ **जानुः**, ऐकारो द्वादशस्वरः ।
१६३ **जापः**, जकारश्चवर्गतृतीयः ।
१६४ **जाया**, जकारश्चवर्गतृतीयः ।
१६५ **जालन्धरपदाधिपः**, गकारः कवर्गतृतीयः ।
१६६ **जालन्धरी**, ठमिति टवर्गद्वितीयपञ्चदशस्वरयोगेन ।
१६७ **जितेन्द्रियः**, दकारस्तवर्गतृतीयः ।
१६८ **जिनबीजम्**, घकारः कवर्गचतुर्थः ।
१६९ **जिष्णुः**, ह्रस्वदीर्घाविकारेकारौ तृतीयचतुर्थस्वरौ ।
१७० **जिह्वा**, दीर्घ ईकारश्चतुर्थस्वरः । झकारश्चवर्गचतुर्थः । ठकारष्टवर्गद्वितीयः । क्रीमिति व्यञ्जनककाररकारचतुर्थस्वरबिन्दुयोगेन।
१७१ **जीमूतः**, वकारोऽन्तस्थचतुर्थः । वमित्यन्तस्थचतुर्थबिन्दुयोगेन।
१७२ **जीवनम्**, ठकारष्टवर्गद्वितीयः ।
१७३ **जीवप्राणौ**, ह्सौमिति दन्त्यसकारहकारचतुर्दशस्वरबिन्दुयोगेन।
१७४ **जीवात्मा**, ळकारो मूर्द्धन्यः ।
१७५ **जीवः**, ठकारष्टवर्गद्वितीयः । दन्त्यसकारः । हकारो व्योमबीजम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१७६ **जेता,** जकारश्चवर्गतृतीयः ।

१७७ **जैत्री,** ह्रस्व इकारस्तृतीयस्वरः ।

१७८ **जङ्घक्षः,** एकार एकादशस्वरः ।

१७९ **जङ्घजः,** एकार एकादशस्वरः ।

१८० **जङ्घा,** एकार एकादशस्वरः । पकारः षष्ठवर्गादिमः ।

१८१ **जाङ्घिनी,** भकारः पवर्गचतुर्थः ।

१८२ **जम्भलः,** णकारष्टवर्गपञ्चमः ।

१८३ **जृम्भिणी,** ह्रस्व इकारस्तृतीयस्वरः । दीर्घ ऊकारः षष्ठस्वरः ।

१८४ **ज्ञनः,** एकार एकादशस्वरः ।

१८५ **ज्ञाता,** ऐकारो द्वादशस्वरः ।

१८६ **ज्ञानदा,** ञकारश्चवर्गपञ्चमः ।

१८७ **ज्ञानदः,** गकारः कवर्गतृतीयः ।

१८८ **ज्ञानपुस्तकधारिणी,** ह्रस्व ऋकारः सप्तमस्वरः ।

१८९ **ज्ञानशक्तिः,** एकार एकादशस्वरः ।

१९० **ज्ञानामृतम्,** ऐकारो द्वादशस्वरः ।

१९१ **ज्ञानी,** ञकारश्चवर्गपञ्चमः । टकारश्चतुर्थवर्गप्रथमः ।

१९२ **ज्ञानम्,** औकारश्चतुर्दशस्वरः । गकारः कवर्गतृतीयः । दकारस्तवर्गतृतीयः ।

१९३ **ज्या,** जकारश्चवर्गतृतीयः ।

१९४ **ज्येष्ठा,** दीर्घ आकारो द्वितीयस्वरः । धकारस्तवर्गचतुर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९५ ज्योतीरूपः, ओमिति प्रणवः ।

१९६ ज्योतीः, ह्रौमिति व्यञ्जनहकाररकारचतुर्दशस्वरबिन्दुयोगेन। त्रौमिति व्यञ्जनतकाररकारचतुर्दशस्वरबिन्दुयोगेन ।

१९७ ज्योत्स्ना, ऌकारो नवमस्वरः । एकार एकादशस्वरः ।

१९८ ज्वलनाक्षरम्, रकारोऽन्तस्थद्वितीयः ।

१९९ ज्वलीनी, ङकारः कवर्गपञ्चमः ।

२०० ज्वाला, औकारश्चतुर्दशस्वरः ।

२०१ ज्वालामाला, ह्रस्व इकारस्तृतीयस्वरः ।

२०२ ज्वालामालिनी, औकारश्चतुर्दशस्वरः ।

२०३ ज्वालामाली, अकारः प्रथमस्वरः ।

२०४ ज्वालामुखी, ह्रस्व इकारस्तृतीयः । ओकारस्त्रयोदशस्वरः ।

२०५ ज्वालामुखः, चकारस्तृतीयवर्गादिमः ।

२०६ ज्वालास्या, ओकारस्त्रयोदशस्वरः ।

२०७ ज्वालिनी, अकारः प्रथमस्वरः । ऋकारः सप्तमस्वरः । ओकारौ-कारौ त्रयोदशचतुर्दशस्वरौ । छकारश्चवर्गद्वितीयः । बकारः पवर्गतृतीयः ।

२०८ ज्वाली, रकारोन्तस्थद्वितीयः ।

इति जकारः ।

२०९ झषध्वजः, क्लीमिति व्यञ्जनककारलकारचतुर्थस्वरबिन्दुयोगेन

२१० झषः, पकारः षष्ठवर्गादिमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२११ झंकारिणी, झकारश्चवर्गचतुर्थः ।
२१२ झंकारी, घकारः कवर्गचतुर्थः । झकारश्चवर्गचतुर्थः ।
२१३ झण्टी, रकारोऽन्तस्थद्वितीयः । दन्त्यसकारः ।
२१४ झण्टीशफा, झकारश्चवर्गचतुर्थः ।
२१५ झिण्टीशः, एकार एकादशस्वरः । तालव्यशकारोऽपि ।

इति झकारः ।

ञकारादि नाम नास्ति ॥

इति श्रीवर्णबीजप्रकाशे चवर्गप्रकाशस्तृतीयः ॥ ३ ॥

अथ टवर्गप्रकाशः ४ ॥

१ टादिः, टकारश्चतुर्थवर्गादिमः ।
२ टंकहस्ता, टकारश्चतुर्थवर्गप्रथमः ।
३ टंकारी, टकारष्टवर्गद्वितीयः ।
४ टंकारः, टकारश्चतुर्थवर्गाद्यः ।

इति टकारः ।

५ ठद्वयम्, स्वाहा अग्निप्रिया ।
६ ठंकारिणी, ठकारष्टवर्गद्वितीयः ।
७ ठान्तः, ठकारष्टवर्गद्वितीयः ।

इति ठकारः ।

८ डकारिणी, झकारश्चवर्गचतुर्थः ।
९ डमरुः, खकारः कवर्गद्वितीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१० डाकिनी, ओकारौकारौ त्रयोदशचतुर्दशस्वरौ । (:) बिन्दुः पञ्चदशस्वरः । डकारष्टवर्गतृतीयः । फकारः पवर्गद्वितीयः ।

११ डाकिनीप्रियः, फकारः पवर्गद्वितीयः ।

१२ डामरी, डकारष्टवर्गतृतीयः ।

१३ डामरः, डकारष्टवर्गतृतीयः ।

१४ डिम्भः, ह्रामिति हकाररकारद्वितीयस्वरबिन्दुयोगेन ।

इति डकारः ।

१५ ढकारिणी, ढकारष्टवर्गचतुर्थः ।

१६ ढक्का, ढकारष्टवर्गचतुर्थः ।

१७ ढलः, ढकारष्टवर्गचतुर्थः ।

इति ढकारः ॥

णकारादि नाम नास्ति ॥

इति श्रीवर्णबीजप्रकाशे टवर्गप्रकाशश्चतुर्थः ॥ ४ ॥

अथ तवर्गप्रकाशः ५.

१ तक्षकः, चकारस्तृतीयवर्गादिमः ।

२ तक्षः, यकारोऽन्तस्थादिमः ।

३ तटम्, हूमिति हकारषष्ठस्वरबिन्दुयोगेन ।

४ तडित्, षकारो मूर्द्धन्यः ।

५ तडिदाभः, तकारः पञ्चमवर्गादिमः ।

६ तडिल्लता, ऐकारो द्वादशस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७ **तनुक्रान्तः**, नकारस्तवर्गपञ्चमः ।

८ **तपनः**, ऋकारः सप्तमस्वरः । नकारस्तवर्गपञ्चमः ।

९ **तमिस्रा**, ङकारः कवर्गपञ्चमः । झकारश्चवर्गचतुर्थः ।

१० **तमी**, पञ्चमवर्गादिमस्तकारः ।

११ **तमोबीजम्**, तकारः पञ्चमवर्गादिमः । लमित्यन्तस्थतृतीयपञ्च-दशस्वरयोगेन ।

१२ **तमः**, नकारस्तवर्गपञ्चमः । लकारोऽन्तस्थतृतीयः ।

१३ **तरलः**, तकारः पञ्चमवर्गादिमः ।

१४ **तरशक्तिः**, दीर्घलृकारो दशमस्वरः ।

१५ **तरङ्गः**, बकारः पवर्गतृतीयः । ळूमिति षष्ठवर्गादिमान्तस्थतृतीय-षष्ठस्वरबिन्दुयोगेन ।

१६ **तारिः**, नकारस्तवर्गपञ्चमः ।

१७ **तर्जनी**, दीर्घ ईकारश्चतुर्थस्वरः ।

१८ **तलम्**, फडित्यस्त्रमन्त्रः ।

१९ **तस्करः**, ङकारः कवर्गपञ्चमः ।

२० **तापिनी**, खकारः कवर्गद्वितीयः । बकारभकारौ पवर्गतृतीय-चतुर्थाविति ।

२१ **तामसी**, आकार औकारो द्वितीयचतुर्दशस्वरौ । चकारस्तृ-तीयवर्गादिमः । तकारः पञ्चमवर्गादिमः ।

२२ **तामालिनी**, दीर्व ऊकारः षष्ठस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२३ तारका, त्रौमिति तकाररकारचतुर्दशस्वरबिन्दुयोगेन ।

२४ तारकः, ओमिति प्रणवः । ओकारश्चतुर्दशस्वरः । तकारः पञ्चमवर्गादिमः । क्षकारोन्तिमवर्णः ।

२५ तारा, टकारश्चतुर्थवर्गादिमः । त्रौमिति तकाररकारौकारबिन्दुयोगेन । त्रयोदशस्वरबिन्दुसहितोऽपि ।

२६ ताराधिपः, द्रांमिति दकाररकारद्वितीयस्वरबिन्दुयोगेन ।

२७ ताराधीशः, ठमिति टवर्गद्वितीयबिन्दुयोगेन ।

२८ तारिणी, हमिति व्योमबीजम् ।

२९ तारः, ओमिति प्रणवोऽकारोकारमकारयोगेन । दीर्घॠकारोऽष्टमस्वरः । तकारः पञ्चमवर्गादिमः ।

३० तालजङ्घा, दीर्घ ऊकारः षष्ठस्वरः ।

३१ तालः, घकारः कवर्गचतुर्थः ।

३२ तिथीशः, दीर्घ ॠकारोऽष्टमस्वरः ।

३३ तिमिरघ्नी, दीर्घ ॠकारोऽष्टमस्वरः ।

३४ तिमिरम्, लकारोऽन्तस्थतृतीयः स एव पञ्चदशस्वरयुक्तोऽपि ।

३५ तिरस्विनी, अकारः प्रथमस्वरः ।

३६ तिरः, ह्रस्व उकारः पञ्चमस्वरः ।

३७ तीक्ष्णपयोधरः, ठं ठः इति टवर्गद्वितीययुगलम्, तत्र प्रथमो बिन्दुसहितो द्वितीयः सविसर्गः पञ्चदशाषोडशस्वरयुक्तठकारस्य तीक्ष्णपयोधरेति नाम ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३८ **तीक्ष्णा,** **प**कारः षष्ठवर्गादिमः ।
३९ **तीरम्,** हूमिति व्यञ्जनहकारषष्ठस्वरबिन्दुयोगेन ।
४० **तीव्रज्ञाना,** **ओ**कारस्त्रयोदशस्वरः ।
४१ **तीव्रा,** **ओ**कारस्त्रयोदशस्वरः ।
४२ **तीव्रः,** **त**कारः पञ्चमवर्गादिमः ।
४३ **तुरगः,** **फ**डित्यस्त्रबीजम् ।
४४ **तुरीयम्,** (ः)विसर्गः षोडशस्वरः ।
४५ **तुर्यबाणः,** व्लूमित्यन्तस्थवकारलकारषष्ठस्वरबिन्दुयोगेन ।
४६ **तुर्यः,** **ध**कारस्तवर्गचतुर्थः ।
४७ **तुला,** **इ**कारस्तृतीयस्वरः । **क**कारो द्वितीयवर्गादिमः ।
४८ **तुष्टिः,** **इ**कार**ई**कारस्तृतीयचतुर्थस्वरौ । अनुस्वारविसर्गौ पञ्चदश षोडशस्वरौ । ङकारः कवर्गपञ्चमः । छकारश्चवर्गद्वितीयः
४९ **तृट्,** **ख**कारः कवर्गद्वितीयः ।
५० **तृतीयकः,** **ब**कारः पवर्गतृतीयः ।
५१ **तृतीयलोचनः,** **च**कारस्तृतीयवर्गादिमः ।
५२ **तृतीया,** **इ**कारस्तृतीयस्वरः । **ऌ**कारो नवमस्वरः
५३ **तृतीयः,** **ल**कारोन्तस्थतृतीयः ।
५४ **तेजोवती,** **ग**कारः कवर्गतृतीयः ।
५५ **तेजः,** **ख**कारः कवर्गद्वितीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५६ **तैजसः,** औकारश्चतुर्दशस्वरः । ककारो द्वितीयवर्गादिमः । रमि-
ति वह्निबीजम् ॥ वकारोन्तस्थचतुर्थः ।
५७ **तोतला,** दीर्घॠकारोऽष्टमस्वरः । ठकारष्टवर्गद्वितीयः ।
५८ **तोतलाबीजम्,** भमिति तकाररकारपञ्चदशस्वरयोगेन ।
५९ **तोमरः,** ह्रस्व उकारः पञ्चमस्वरः ।
६० **तोमा,** ओमिति प्रणवः ।
६१ **तोयम्,** दकारधकारौ तवर्गतृतीयचतुर्थौ । वकारोन्तस्थचतुर्थः
६२ **तन्द्री,** मकारः पवर्गपञ्चमः ।
६३ **ताण्डवम्,** चकारस्तृतीयवर्गादिमः ।
६४ **तुण्डाक्षरः,** ककारो द्वितीयवर्गादिमः ।
६५ **तुम्बुरुबीजम्,** क्ष्मृर्य्ऊमिति व्यञ्जनरूपक्षकारमकाररकारा-
न्तस्थयकारषष्ठस्वरबिन्दुयोगेन पञ्चवर्णात्मकः ।
६६ **तुम्बुरुशैवबीजम्,** क्ष्मृयृम् इत्यन्तिमक्षकारमकारान्तस्थयकार-
रकारपञ्चदशस्वरयोगेन चतुर्वर्णात्मकः ।
६७ **तुम्बुरुः,** क्षकारो वर्णान्तिमः ।
६८ **त्रपा,** ह्रीमिति हकाररकारचतुर्थस्वरबिन्दुयोगेन ।
६९ **त्राणात्मा,** ञकारश्चवर्गपञ्चमः ।
७० **त्रासः,** ओमिति प्रणवः । डकारष्टवर्गतृतीयः ।
७१ **त्रिकूटः,** ओमिति प्रणवः । दीर्घॡकारो दशमस्वरः ।
७२ **त्रिकोणः,** एकार एकादशस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७३ **त्रिकण्टकीबीजम्**, खोमिति कवर्गद्वितीयत्रयोदशस्वरबिन्दुयोगेन ।
७४ **त्रिकः**, ओमिति प्रणवः ।
७५ **त्रिगुणाकारः**, णकारष्टवर्गपञ्चमः ।
७६ **त्रिगुणात्मा**, दीर्घॠकारोऽष्टमस्वरः ।
७७ **त्रिगुणः**, ओमिति प्रणवः ।
७८ **त्रिगः**, ऐकारो द्वादशस्वरः ।
७९ **त्रिजटः**, तकारः पञ्चमवर्गादिमः ।
८० **त्रितत्त्वम्**, ओमिति प्रणवः ।
८१ **त्रिदशालयः**, अन्तिमक्षकारः ।
८२ **त्रिदिवः**, अन्तिमक्षकारः ।
८३ **त्रिदृक्**, धकारः कवर्गचतुर्थः ।
८४ **त्रिदैवतः**, ओमिति प्रणवः ।
८५ **त्रिधातुः**, तालव्यशकारः ।
८६ **त्रिनेत्रः**, घकारः कवर्गचतुर्थः ।
८७ **त्रिपदा**, ह्रस्वऋकारः सप्तमस्वरः ।
८८ **त्रिपुटा**, एकार एकादशस्वरः ।
८९ **त्रिपुरमालिनी**, व्लूमित्यन्तस्थवकारलकारषष्ठस्वरबिन्दुयोगेन ।
९० **त्रिपुरसिद्धा**, ह्रस्वऋकारः सप्तमस्वरः ।
९१ **त्रिपुरसुन्दरी**, इकारेकारौ ह्रस्वदीर्घौ तृतीयचतुर्थस्वरौ । रकारो वन्हिबीजम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९२ त्रिपुरा, ह्रस्वउकारः पञ्चमस्वरः । ऐकारो द्वादशस्वरः । ञकारश्च-वर्गपञ्चमः ।

९३ त्रिपुरेशी, दीर्घऊकारः षष्ठस्वरः ।

९४ त्रिपुरेश्वरी, दीर्घआकारो द्वितीयस्वरः ।

९५ त्रिपुरघ्नी, ह्रस्वउकारः पञ्चमस्वरः ।

९६ त्रिपुरान्तकः, घकारः कवर्गचतुर्थः ।

९७ त्रिपुराम्बा, दीर्घॠकारोऽष्टमस्वरः ।

९८ त्रिपुरः, अकारः प्रथमस्वरः । उकारः पञ्चमस्वरः । णकारष्टव-र्गपञ्चमः

९९ त्रिबिन्दुः, छकारश्चवर्गद्वितीयः ।

१०० त्रिमातृका, ओकारस्त्रयोदशस्वरः ।

१०१ त्रिमात्रा, दीर्घ ऊकारः षष्ठस्वरः । दीर्घॠकारोऽष्टमस्वरः ।

१०२ त्रिमात्रः, ओमिति प्रणवः ।

१०३ त्रिमूर्त्तिः, दीर्घ ईकारश्चतुर्थस्वरः । क्लीमिति ककारलकार-चतुर्थस्वरबिन्दुयोगेन ।

१०४ त्रियात्रकः, मूर्धन्यषकारः ।

१०५ त्रिरेखः, णकारष्टवर्गपञ्चमः ।

१०६ त्रिरण्डा, मकारः पवर्गपञ्चमः ।

१०७ त्रिलोकीवशकारकः, खकारः कवर्गद्वितीयः ।

१०८ त्रिलोका, दीर्घॠकारोऽष्टमस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०९ **त्रिलोचनप्रियः,** भकारः पवर्गचतुर्थः ।
११० **त्रिलोचना,** (ः) विसर्गः षोडशस्वरः ।
१११ **त्रिलोचनः,** गकारः कवर्गतृतीयः । चकारस्तृतीयवर्गादिमः
११२ **त्रिवक्रः,** डकारष्टवर्गतृतीयः ।
११३ **त्रिवर्णा,** दकारस्तवर्गतृतीयः ।
११४ **त्रिवर्णिका,** ह्रस्वउकारः पञ्चमस्वरः ।
११५ **त्रिवलिप्रियः,** बकारः पवर्गतृतीयः
११६ **त्रिविक्रमः,** ह्रस्वऋकारः सप्तमस्वरः । एकार एकादशस्वरः ।
११७ **त्रिशिखः,** ॐ इति प्रणवः ।
११८ **त्रिशूली,** जकारश्चवर्गतृतीयः ।
११९ **त्रिस्रोताः,** एकार एकादशस्वरः ।
१२० **त्रैपुरकामबीजम्,** ह्स्क्ल्र्ईमिति व्यञ्जनहकारदन्त्यसकार-ककारलकाररकारचतुर्थस्वरबिन्दुयोगेन षड्वर्णात्मकम् ।
१२१ **त्रैपुरवाग्भवम्,** ह्स्क्ल्र्ऐमित्यूष्मान्तहकारदन्त्यसकारद्वितीयवर्गादिमककाराऽन्तस्थलकाररकारद्वादशस्वरबिन्दुयोगेनषड्वर्णात्मकम् ।
१२२ **त्रैपुरशक्तिबीजम्,** ह्स्क्ल्र्औमितित्यूष्मचतुर्थहकारदन्त्यसकारककारलकाररकारचतुर्दशस्वरबिन्दुयोगेन षड्वर्णात्मकम् ।
१२३ **त्रैलोक्यग्रसनात्मकः,** क्षकारो वर्णान्तिमः ।
१२४ **त्रैलोक्यमोहनः,** क्लीमिति ककारलकारचतुर्थस्वरबिन्दुयोगेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२५ त्रैलोक्यविजया, ओकारस्त्रयोदशस्वरः ।
१२६ त्रैलोक्यविद्या, घकारः कवर्गचतुर्थः । ङकारः कवर्गपञ्चमः ।
१२७ त्रैलोक्यहर्त्ता, घकारः कवर्गचतुर्थः ।
१२८ त्र्यक्षरः, ॐइति प्रणवः ।
१२९ त्र्यक्षः, ॐइति प्रणवः ।
१३० त्र्यर्णः, ॐइति प्रणवः ।
१३१ त्रैगुण्यः, ॐइति प्रणवः ।
१३२ त्र्यङ्कः, ॐइति प्रणवः ।
१३३ त्र्यम्बकः, ॐइति प्रणवः ।
१३४ त्वक्, यकारोऽन्तस्थादिमः ।
१३५ त्वरा, ऐकारो द्वादशस्वरः ।
१३६ त्वरिता, ऐकारो द्वादशस्वरः । दीर्घऋकारोऽष्टमस्वरः ।
१३७ त्वष्टा, ह्रस्वदीर्घेकारेकारौ तृतीयचतुर्थस्वरौ ।
(०) अनुस्वारः पञ्चदशस्वरः ।

। इति तकारः ॥

थादिनाम्नामभावः ॥

१३८ दक्षकाटिः, टकारश्चतुर्थवर्गादिमः ।
१३९ दक्षकर्णः, उकारः पञ्चमस्वरः ।
१४० दक्षकारः, घकारः कवर्गचतुर्थः ।
१४१ दक्षकूर्परः, खकारः कवर्गद्वितीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१४२ दक्षगतः, ह्रस्वऌकारो नवमस्वरः ।
१४३ दक्षगुल्फः, डकारष्टवर्गतृतीयः। धकारस्तवर्गचतुर्थः।
१४४ दक्षगण्डः, ह्रस्वऌकारो नवमस्वरः ।
१४५ दक्षजानुः, एकार एकादशस्वरः ठकारष्टवर्गद्वितीयः ।
१४६ दक्षजङ्घा, ओकारस्त्रयोदशस्वरः । डकारष्टवर्गतृतीयः ।
१४७ दक्षदारणः, दकारस्तवर्गतृतीयः ।
१४८ दक्षनादः, हमिति व्योमबीजम् ।
१४९ दक्षनासाधिपः, थकारस्तवर्गद्वितीयः ।
१५० दक्षनासः, ह्रस्वऋकारः सप्तमस्वरः ।
१५१ दक्षनेत्रः, इकारस्तृतीयस्वरः ।
१५२ दक्षपदग्रगः, णकारष्टवर्गपञ्चमः ।
१५३ दक्षपादादिः, टकारश्चतुर्थवर्गादिमः ।
१५४ दक्षपादाङ्गुलः, टकारश्चतुर्थवर्गादिमः ।
१५५ दक्षपादाङ्गुलिः, णकारष्टवर्गपञ्चमः ।
१५६ दक्षपादः, ढकारष्टवर्गचतुर्थः । णकारष्टवर्गपञ्चमः । दकार-
स्तवर्गतृतीयः । दन्त्यसकारः ।
१५७ दक्षपार्श्वः, तकारः पञ्चमवर्गादिमः ।
१५८ दक्षबाहुमूलः, ककारो द्वितीयवर्गादिमः ।
१५९ दक्षबाहुः, खकारः कवर्गद्वितीयः ।
६० क्षस्कन्धः, ककारो द्वितीयवर्गादिमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१६१ दक्षस्फिक्, टकारश्चतुर्थवर्गादिमः ।

१६२ दक्षहस्तः, तालव्यशकारः ।

१६३ दक्षहृत, शकारस्तालव्यः ।

१६४ दक्षा, एकार एकादशस्वरः ।

१६५ दक्षास्यः, टकारश्चतुर्थवर्गादिमः ।

१६६ दक्षिणाकाली, ठकारष्टवर्गद्वितीयः ।

१६७ दक्षिणी, ञकारश्चवर्गपञ्चमः ।

१६८ दक्षिणोरवः, झकारश्चवर्गचतुर्थः

१६९ दक्षिणाङ्गुलिमूलगः, घकारः कवर्गचतुर्थः ।

१७० दक्षिणांशगः, रमिति वह्निबीजम् ।

१७१ दक्षिणः, ह्रस्वऋकारः सप्तमस्वरः ।

१७२ दक्षाङ्गुल्यग्रः, ङकारः कवर्गपञ्चमः ।

१७३ दनुजप्रसूः, दीर्घॡकारो दशमस्वरः ।

१७४ दनुजातिशः, खकारः कवर्गद्वितीयः ।

१७५ दमा, दकारस्तवर्गतृतीयः ।

१७६ दया, दीर्घॠकारोऽष्टमस्वरः । जकारश्चवर्गतृतीयः । दकारस्तवर्गतृतीयः ।

१७७ दर्दुरः, मकारः पवर्गपञ्चमः ।

१७८ दर्शकः, ओकारस्त्रयोदशस्वरः ।

१७९ दर्शनम्, चकारस्तृतीयवर्गादिमः । घकारस्तवर्गचतुर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१८० **दशमी,** दीर्घलृकारो दशमस्वरः ।
१८१ **दहनः,** नकारस्तवर्गपञ्चमः । रकारोऽन्तस्थद्वितीयो वह्निबीजम् ।
१८२ **दाक्षायणी,** ह्रस्वउकारः पञ्चमस्वरः । दकारस्तवर्गतृतीयः ।
१८३ **दाता,** दकारस्तवर्गतृतीयः ।
१८४ **दात्री,** दकारस्तवर्गतृतीयः ।
१८५ **दानवेज्यः,** व्रोमिति वकाररकारत्रयोदशस्वरबिन्दुयोगेन ।
१८६ **दानम्,** णकारष्टवर्गपञ्चमः । दकारस्तवर्गतृतीयः । रकारोऽन्तस्थद्वितीयो वह्निबीजम् ।
१८७ **दामोदरः,** ऐकारो द्वादशस्वरः ।(ः)विसर्गः षोडशस्वरः ।
१८८ **दारकः,** डकारष्टवर्गतृतीयः ।
१८९ **दारुणा,** (०) अनुस्वारः पञ्चदशस्वरः ।
१९० **दावः,** टकारश्चतुर्थवर्गादिमः ।
१९१ **दाहः,** रकारोऽन्तस्थचतुर्थो वह्निबीजम् ।
१९२ **दिक्,** झकारश्चवर्गचतुर्थः ।
१९३ **दिगम्बरा,** ओकारस्त्रयोदशस्वरः । घकारः कवर्गचतुर्थः ।
१९४ **दिगम्बरः,** खकारः कवर्गद्वितीयः ।
१९५ **दितिः,** ङकारः कवर्गपञ्चमः । चकारस्तृतीयवर्गादिमः । लकारोऽन्तस्थतृतीयः ।
१९६ **दिनरूपा,** ञकारश्चवर्गपञ्चमः ।
१९७ **दिवाकरः,** एकार एकादशस्वरः । थकारस्तवर्गद्वितीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९८ दिवानाथः, कःकारो द्वितीयवर्गादिमः ।
१९९ दीनदः, धकारस्तवर्गचतुर्थः ।
२०० दीनः, दकारस्तवर्गतृतीयः ।
२०१ दीपिका, ह्रस्वदीर्घावुकारोकारौ पञ्चमषष्ठस्वरौ । ऋकारः सप्तमस्वरः । ऐकारो द्वादशस्वरः ।
२०२ दीपः, रकारोऽन्तस्थद्वितीयः ।
२०३ दीप्ता, रमिति वह्निबीजम् ।
२०४ दीप्तः, मकारः पवर्गपञ्चमः ।
२०५ दीप्तिः, ह्रस्वलृकारो नवमस्वरः । भकारः पवर्गचतुर्थः ।
२०६ दीर्घघोरणा, ह्रस्वदीर्घावुकारोकारौ पञ्चमषष्ठस्वरौ ।
२०७ दीर्घच्छाया, आकारो द्वितीयस्वरः ।
२०८ दीर्घजिह्वा, ह्रस्वलृकारो नवमस्वरः । नकारस्तवर्गपञ्चमः ।
२०९ दीर्घजङ्घा, घकारस्तवर्गचतुर्थः ।
२१० दीर्घद्रोणा, नकारस्तवर्गपञ्चमः ।
२११ दीर्घनासावती, ओकारस्त्रयोदशस्वरः ।
२१२ दीर्घप्रणवः, औमिति चतुर्दशस्वरबिन्दुयोगेन ।
२१३ दीर्घबाहुकः, चकारस्तृतीयवर्गादिमः ।
२१४ दीर्घबाहुः, छकारझकारौ चवर्गद्वितीयचतुर्थौ ।
२१५ दीर्घमुखी, दीर्घॠकारोऽष्टमस्वरः ।
२१६ दीर्घवक्त्रा, औकारश्चतुर्दशस्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२१७ **दीर्घवाहा,** जकारश्चवर्गतृतीयः ।

२१८ **दीर्घसूः,** भकारः पवर्गचतुर्थः ।

२१९ **दीर्घा,** नकारस्तवर्गपञ्चमः । ठकारष्टवर्गद्वितीयः ।

२२० **दीर्घायुः,** झकारश्चवर्गचतुर्थः । दीर्घ ऊकारः षष्ठस्वरः ।

२२१ **दीर्वेशः,** दीर्घऊकारः षष्ठस्वरः ।

२२२ **दीर्घः,** आकारो द्वितीयस्वरः (०) अनुस्वारः पञ्चदशस्वरः

२२३ **दुर्गनिवासिनी,** ओकारस्त्रयोदशस्वरः ।

२२४ **दुर्गा,** अकारः प्रथमस्वरः । ऐकारो द्वादशस्वरः । (०) अनुस्वारः पञ्चदशस्वरः । खकारघकारौ कवर्गद्वितीयचतुर्थवर्णौ दकारस्तवर्गतृतीयः । दन्त्यसकारः । हमिति व्योमबीजम् ।

२२५ **दुर्गाबीजम्,** दुःदुमिति आद्यस्तवर्गतृतीयपञ्चमस्वरविसर्गयोगेन । द्वितीयस्तवर्गतृतीयपञ्चमस्वरबिन्दुयोगेन ।

२२६ **दुर्गः,** खकारः कवर्गद्वितीयः ।

२२७ **दुर्दिनी,** फकारः पवर्गद्वितीयः ।

२२८ **दुद्धरा,** दीर्घॠकारोऽष्टमस्वरः ।

२२९ **दुर्भगा,** ऌकारोऽन्तस्थतृतीयः ।

२३० **दुर्मुखः,** झकारञकारौ चवर्गचतुर्थपञ्चमवर्णौ ।

२३१ **दुली,** मकारः पवर्गपञ्चमः ।

२३२ **दृढः,** ळकारो मूर्द्धन्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२३३ हृश्यकेतुः, मूर्द्धन्यषकारः ।

२३४ देवतरुः, दीर्घऊकारः षष्ठस्वरः ।

२३५ देवभक्षः, ठकारष्टवर्गद्वितीयः ।

२३६ देवमाता, ऋकारः सप्तमस्वरः ।

२३७ देवयोनिः, ऌकारो नवमस्वरः ।

२३८ देवी, दीर्घॠकारोऽष्टमस्वरः । फकारः पवर्गद्वितीयः । हँकारो व्योमबीजम् ।

२३९ देवीकोटः, चकारस्तृतीयवर्गादिमः ।

२४० देवीपीठाधिपः, चकारस्तृतीयवर्गादिमः ।

२४१ देवीप्रणवः, ह्रींमिति हकाररेफचतुर्थस्वरबिन्दुयोगेन ।

२४२ देवीबीजम्, दन्त्यसकारः ।

२४३ देवः, चकारस्तृतीयवर्गादिमः । टकारश्चतुर्थवर्गादिमः । क्षकारोऽन्तिमवर्णः ।

२४४ देशः, मूर्द्धन्यषकारः ।

२४५ दैत्यमाता, दीर्घॠकारोऽष्टमस्वरः ।

२४६ दैत्यामात्यः, ब्रोंमिति बकाररकारत्रयोदशस्वरबिन्दुयोगेन ।

२४७ दैवज्ञः, दीर्घॠकारोऽष्टमस्वरः ।

२४८ दोग्ध्री, ह्रस्वऋकारः सप्तमस्वरः ।

२४९ दण्डनः, दकारस्तवर्गतृतीयः ।

२५० द्वाण्डिनी, खकारः कवर्गद्वितीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२५१ दण्डी,(०) अनुस्वारः पञ्चदशस्वरः । थकारस्तवर्गद्वितीयः ।

२५२ दण्डीशः, थकारस्तवर्गद्वितीयः ।

२५३ दण्डः, (०)अनुस्वारः पञ्चदशस्वरः ।

२५४ दण्डचः, (०) अनुस्वारः पञ्चदशस्वरः ।

२५५ दन्तनामा, औंकारस्त्रयोदशस्वरः ।

२५६ दन्तिका, घकारः कवर्गचतुर्थः ।

